श्लोक २९ में प्राण और अपान की गति को रोककर रेचक, पूरक और कुम्भक रूप प्राणायाम करनेवाले को यज्ञ का अनुष्ठान करने वाला बतलाया है। श्लोक ३० में मिताहारी होकर प्राणोंमें हवन करना कहा गया है और यह बतलाया गया है कि 'सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः'। ऊपर लिखे ये सारेके सारे ही यज्ञके रहस्य को जाननेवाले एवं याज्ञिक हैं और उनके उन सारे द्रव्ययज्ञ, योगयज्ञ, स्वाध्याय एवं ज्ञान यज्ञके अनुष्ठानसे उनके सारे पाप नष्ट हो जाते हैं।

श्लोक ३२ में कहा है—

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे।
कर्मजान्विद्धितान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥

प्रजापति ने ऐसे और बहुतसे यज्ञों का विधान किया है परन्तु कोई भी यज्ञ बिना कर्मके नहीं हो सकता। अतएव ईश्वराज्ञा रूप कर्म करते रहना और ईश्वरमें भक्ति और आस्था रखकर हरि का नाम भजते रहना ही मनुष्य का परम उद्देश्य होना चाहिये।

नामस्मरण

नामस्मरणसे भक्त समुदाय ईश्वरका नाम स्मरण ही समझता है और इस नामस्मरण की अनादिकालसे बड़ी महिमा गाई गई है। यजुर्वेदके ३२ वें अध्याय का तीसरा मन्त्र बड़ा ही प्रसिद्ध है और वह यह है—

न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः ।
हिरण्यगर्भ इत्येष मा मा हिंसीदित्येषा यस्मान्न जात इत्येषः ॥

उस महिमामहान सच्चिदानन्द परमात्मा की, कोई प्रतिमा नहीं है (उसका सादृश्य, उपमान या नपैना कुछ भी नहीं है)। उसका नाम बड़ा यशवाला है। उसकी महिमा का वर्णन 'हिरण्यगर्भ' आदि मन्त्रों द्वारा, 'मामा हिंसीत्' इस मन्त्रसे और 'यस्मान्नजात.' इत्यादि मन्त्रोंसे वेदोंमें किया गया है।

ऊपरके मन्त्रमें तीन मन्त्रोंके जो प्रतीक दिये गये हैं वे एक के बाद एक अर्थ सहित नीचे लिखे जाते हैं—

हिरण्यगर्भ. समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥
ऋ० १०।१२१।१

जिसके गर्भमें अनेक तेजस्वी पदार्थ हैं अर्थात् जो सुवर्ण आदि धातुओं एवं सूर्य चन्द्रादि ज्योतिष्मान् लोकों का उत्पन्न करनेवाला है वह सृष्टिके पूर्व भी वर्तमान था। वह सब बने हुए संसार का एक ही स्वामी प्रसिद्ध है। उसने पृथिवी को धारण किया है और इस द्युलोक को भी धारण किया है। उस आनन्दस्वरूप एक देव की ही हम सब उपासना करें।

मा मा हिंसीज्जनिता यः पृथिव्याः यो वा दिवश्च सत्यधर्मा व्यानट् ।
यश्चापश्चन्द्राः प्रथमो जजान कस्मै देवाय हविषा विधेम॥यजु०१२।१०२

हे प्रभो आपने इस पृथिवी और द्युलोक को बनाया है। आपने ही जल और चन्द्रमा को उत्पन्न किया है। आप हमारी सब प्रकारसे रक्षा कर और सारे दुःख और नाना प्रकार की पीडाओंसे हमें बचायें। हम सब आपकी ही उपासना और प्रार्थना करें आपको ही

अपना एक मात्र शरण और अवलम्ब मान आपकी ही पूजा और आराधना करें।

यस्मान्न जातः परो अन्यो अस्ति य आविवेश भुवनानि विश्वा।
प्रजापतिः प्रजया सꣳरराणस्त्रीणिज्योतीꣳषिसचते स षोडशी ॥य०८।३६

जिस प्रभुसे बढ़कर कोई दूसरा नहीं है, जो विश्वस्रष्टा इन सारे लोकलोकान्तरोंमें प्रविष्ट और व्यापक है, वह परमपिता परमात्मा अपनी प्रजाके साथ रमण करता हुआ अर्थात् सारे प्राणियों का पालन करता हुआ उनका सुखसम्पादन कर रहा है। वही प्रभु सूर्य चन्द्र एवं अग्नि रूप तीन ज्योतियों एवं सोलह कलाओंवाले विश्व ब्रह्माण्ड का धर्ता, कर्त्ता और विधाता है।

ये मन्त्र बतला रहे हैं कि उस प्रभु की महिमा का पारावार नहीं है। उसके समान 'न भूतो न भविष्यति' न तो कोई हुआ और न होगा। उस प्रभुके नामके माहात्म्य को शब्दोंमें पूरा-पूरा वर्णन कर सकना गागरमें सागर भरनेके समान असम्भव कार्य है। इसी कारण तो प्रभु की महिमाके सम्बन्धमें कहते-कहते ऋषि मुनि नेति-नेति कहकर मूक हो जाते हैं।

प्रभुके नाम असंख्य हैं। क्योंकि प्रभुके कोई नाम निरर्थक नहीं हैं। साधारण मनुष्योंके नाम तो निरर्थक हो भी सकते हैं परन्तु परमेश्वरके सारे नाम उसके गुण कर्म स्वभावके अनुसार ही दिये गये हैं। चूंकि परमात्माके गुण कर्म और स्वभावका अन्त नहीं वैसे ही उसके नाम भी अनन्त हैं। सर्वव्यापक होनेके कारण उसका नाम विष्णु, सबसे बड़ा होनेके कारण उसका नाम ब्रह्म, सृष्टिकी रचना द्वारा उसका विस्तार करनेके कारण उसका नाम

तस्य वाचकः प्रणवः ।

प्रणव अर्थात् ओ३म् उस प्रभुका निज नाम है।

योगदर्शन आगे चलकर कहता है 'तज्जपस्तदर्थभावनम्' उस ओ३म् नामका जप उसके अर्थ चिन्तनपूर्वक करना ही यथार्थमें नाम जप है।

ओ३म् अक्षर जो परमात्माका सबसे श्रेष्ठ नाम है और उसी नामका जप आदि करना चाहिये इत्यादिके सम्बन्धमें छान्दोग्य उपनिषद् प्रथम अध्यायका प्रथम वाक्य और उसपर स्वामी शङ्कराचार्यका भाष्य विशेष ध्यान देनेके योग्य है। उपनिषद् कहती है—

ओ३मित्येतदक्षरमुद्‌गीथमुपासीत।

इसपर शाङ्कर भाष्य निम्नलिखित है—

ओ३मित्येतदक्षरं परमात्मनोऽभिधानं नेदिष्ठम् तस्मिन् हि प्रयुज्यमाने स प्रसीदति, प्रियनामग्रहण इव लोकः। एवं नामत्वेन प्रतीकत्वेन च परमात्मोपासनसाधनं श्रेष्ठमिति सर्ववेदान्तेष्ववगतम्। जपकर्म स्वाध्यायाद्यन्तेषु च बहुशः प्रयोगात्प्रसिद्धमस्य श्रैष्ठ्यम्। अतस्तदेतद-क्षरं वर्णात्मकमुद्‌गीथभक्त्यवयवत्वादुद्‌गीथशब्दवाच्यमुपासीत।

अर्थात् ओ३म् अक्षर परमात्माका निकटतम (नेदिष्ठ) नाम है। (नेदिष्ठ या निकटतम इसलिये कहा गया है कि प्रभु की अनन्त महत्ता या इयत्ता वाणी द्वारा निःशेष रूपसे बताई तो जा नहीं सकती उसके स्वरूप या सामर्थ्यका दिग्दर्शनमात्र ही कराया जा सकता है)। इस ओ३म् नामके लेनेसे प्रभु वैसे ही प्रसन्न होते हैं जैसे मनुष्य उसके प्रिय नाम लेनेसे प्रसन्न होता है। (इसका भाव यह है ओ३म् नामस्मरणसे ही मनुष्यका सबसे बड़ा कल्याण होता है। वास्तवमें जैसा अन्यत्र कहा जा चुका है प्रभुकी अपनी प्रसन्नता अप्रसन्नता का

तो कोई प्रश्न ही नहीं उठता क्योंकि वह कोई साधारण मनुष्यों जैसा तो है नहीं)। इसी ओ३म् नाम या प्रतीकसे परमात्माकी उपासना करना सबसे श्रेष्ठ है यह वेदान्त अर्थात् वेदके अन्तिम लक्ष्य ब्रह्मप्राप्ति परक मंत्रभागों किंवा अन्यान्य सारे ब्रह्मविद्याविधायक ग्रंथोंका निश्चित मत है। जप, कर्मकाण्ड (यज्ञादि), एवं ग्रंथोंके अध्यायोंके आदि एवं अंतमें ओ३म् नामका ही प्रयोग सर्वत्र देखे जानेसे इसकी श्रेष्ठता सिद्ध होती है। भक्ति का सबसे बड़ा साधन होनेके कारण भक्त इस नामका गान करते हैं इसलिये इस ओ३म् अक्षरका ही दूसरा नाम उद्गीथ है। इसी ओ३म् अर्थात् उद्गीथ की उपासना करनी चाहिये।

यजुर्वेदका चालीसवां अध्याय जो उपनिषदोंमें सबसे अधिक प्राचीन ईशोपनिषत्के नामसे भी प्रसिद्ध है उसका सतरहवां मंत्र कहता है—

वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम्।
ओ३म् क्रतो स्मर क्लिबे स्मर कृतꣳ स्मर ॥

मृत्युके उपरांत शरीर पिण्डमें स्थित प्राणवायु ब्रह्माण्डस्थ वायुमें मिल जायगी, भौतिक शरीर चिता की अग्निमें जलकर भस्म हो जायगा, इस रूपमें यह सदा नहीं रहनेवाला है, परंतु जीवात्मा, अमृत है, अमर है, जरामरणसे रहित है। अतएव मनुष्यको जो कर्मशील है ओ३म् का स्मरण और जप करना चाहिये। अपने किये हुए कर्मोंको स्मरण करना चाहिये अर्थात् उनपर विचारात्मक दृष्टि डालनी चाहिये जैसा कि मनु आदि स्मृतिकारोंने कहा है—

प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः।
किन्नु मे पशुभिस्तुल्यं किन्नु सत्पुरुषैरुत ॥

अर्थात् मनुष्य को यह प्रतिदिन देखते रहना चाहिये कि हमारे

कर्म कैसे हो रहे हैं, कौनसे हमारे कर्म विवेकहीन पशुओंके जैसे और कौनसे कर्म मननशील मनुष्योंके जैसे हुए हैं वा हो रहे हैं। इस प्रकारके आत्मनिरीक्षण से हमें अपने किये हुए अशुभकर्मोंके लिए ग्लानि होकर हमारे आगे होनेवाले कर्म शुभ होंगे)। इस ओ३म् के जपसे और अपने कृत कर्मोंके पर्यवेक्षणसे मनुष्यको बल की प्राप्ति होगी कठिनसे कठिन कार्य उसके लिए सुकर होगा और सब प्रकार से उद्धार होगा। इस मंत्रमें मनुष्यको कर्मशील (क्रतु) इस कारणसे कहा है कि चौरासी लाख योनियोंमेंसे केवलमात्र मनुष्य योनि ही कर्म-योनि है अर्थात् मनुष्यको ही कर्म करने की स्वतंत्रता प्रभु की ओरसे प्राप्त है। और बाकी योनियाँ भोगयोनियाँ हैं। इन योनियोंमें—पशु, कीट, पतंग, वृक्षादि की योनियोंमें--उत्पन्न जीवोंको कर्म करने की स्वतंत्रता नहीं है, वे योनियां केवल फल भोगनेके लिये ही मिली हुई हैं।

इस मंत्रमें ओ३म् जपका ही विधान है।

जैसा ऊपर कहा गया है जप, अर्थ पर मनन करते हुए ही होना चाहिये और पूरी तन्मयता से। उस समय अन्य विषयों पर मनको नहीं जाने देना चाहिये। ओ३म् के अर्थों का कोई अन्त नहीं है। माण्डूक्य उपनिषद् एवं छान्दोग्य उपनिषद्में इसका विस्तारसे वर्णन है। संक्षेपमें इसके अ, उ, और म ये तीन अक्षर यह बोध करा रहे हैं कि प्रभु अ अक्षरके जैसा जगत् का आदि कारण है, स्वर अर्थात् स्वयं प्रकाशस्वरूप एवं अन्यों को प्रकाशित करनेवाला है, सारे व्यञ्जन वर्णोंमें जिस प्रकार 'अ' अक्षर विद्यमान है परन्तु उसे केवल विद्वान् देख सकते हैं उसी प्रकार प्रभु चराचर जगत्में व्यापक होते हुए भी उसकी दिव्य ज्योतिका दर्शन, उसकी सत्ताका भान, विद्वान् योगिजनों को ही होता है। 'उ' अक्षर प्रभुके जगत् पालक स्वरूपका बोध कराता

है। ओ३म् अक्षरके 'म' के उच्चारणके साथ ही मुखका कपाट बंद हो जाता है। इससे यह प्रकट होता है कि प्रभु इस सृष्टि की उत्पत्ति और धारणके साथ ही इसका प्रलय करनेवाला भी है। प्रभु परमात्मा का प्रलयकर्त्ता होना भी उसकी दयालुता का ही द्योतक है क्योंकि मृत्युके नियममें भी भक्त एवं योगिजन प्रभुकी महिमा और कृपा ही देखते हैं।

सबसे सरल अर्थ 'ओ३म्' का 'रक्षक' है। क्योंकि इसकी व्युत्पत्ति 'अव् रक्षण इस धातुसे भी बनती है।

साधक जप करते हुए प्रभु की अपार महिमा का चिन्तन करे और मनमें यह दृढ धारणा रखे कि प्रभु हमारा रक्षक है तो वह सारे दुखों से छूट जायगा।

भक्तोंने 'राम' नामके जप की भी बडी महिमा गाई है। भक्तप्रवर गोस्वामी तुलसीदासजीने रामनाम की महिमा की पराकाष्ठा दिखला दी जब उन्होंने अपनी रामायणमें कह दिया—

'राम न सकहिं नाम गुण गाई'।

सचमें जब प्रभुकी महिमाका अन्त ही नहीं है तो प्रभु स्वयं ही उसका अन्त कैसे जान सकते। परमात्माका ज्ञान सत्य है। तो सान्त को सान्त और अनन्त को अनन्त जानना ही तो सत्य ज्ञान है।

'शिव' नामका जप भी कुछ भक्त करते हैं। प्रभुके अन्य नामोंका भी जप अपनी रुचिके अनुकूल किया जा सकता है, क्योंकि 'भिन्न रुचिर्हि लोक' मनुष्योंकी रुचि भिन्न-भिन्न हुआ करती है। परन्तु शुद्ध हृदयसे जप्य नाम के अर्थों पर विचार करते हुए प्रभु को सब स्थानोंमें वर्तमान, सबके कर्मों को देखनेवाला, सबकी रक्षा करनेवाला समझकर और अपनेको सारे दोषोंसे पृथक् रखकर प्रभु की आज्ञा पर चलनेका दृढ़ संकल्प मनमें करते हुए श्रद्धा एवं भक्तिके साथ नामस्मरण या जप

करनेसे ही प्रभु की कृपा प्राप्त होगी। कबीरदासजीने बड़ाही सुन्दर कहा है—

'बिनु पहिचाने बिनु गहि पकड़े राम कहे का होई'।

जप जोरसे बोलकर, बिना शब्द किये केवल ओष्ठ, जिह्वा आदि वर्णोंके उच्चारण स्थानोंका प्रयोग कर तथा बिल्कुल मन ही मन जिसमें ओष्ठ आदि भी न हिलें तीन प्रकारसे किये जा सकते हैं। परन्तु इन तीनों में से अन्तिम प्रकारका जप ही शास्त्रोंमें श्रेष्ठ माना गया है। इस प्रकारके जपमें मनकी एकाग्रता एवं निर्विषयता की अत्यन्त आवश्यकता है। प्रारंभमें पहले या दूसरे प्रकारका भी जप किया जा सकता है।

जप करनेमें मालों की अनिवार्य आवश्यकता तो नहीं है क्योंकि प्रभुके साथ कोई मोलजोल तो करना है नहीं। परन्तु नियमनिष्ठता के पालनमें माला बड़ी सहायक हो सकती है। हम यदि निश्चय करलें कि बिना एक सौ आठ बार या एक हजार बार जप किये हम भोजन नहीं करेंगे तो हम आवश्यकरूपसे जप करने लगेंगे और एक नियम बंध जायगा। उस अवस्था में गिनती करनेके लिए मालेके दानों की आवश्यकता हो सकती है। परन्तु मालों इत्यादिके पीछे बहुत चिंतित होना और उनको बहुत अधिक महत्त्व देना आवश्यक नहीं, किसी भी माले पर गिनती कर सकते हैं, अंगुलियों पर भी गिनती हो सकती है।

नियमित रूप से स्नान सन्ध्या आदिके बाद निश्चित संख्यामें जप तो मालाओं पर कर सकते हैं। परन्तु जब कभी भी अवकाश मिले, कोई काम न रहे, जैसे गाड़ी, सवारीमें बैठे हुए, राह चलते हुए, अथवा रातमें बिछावन पर पड़े (नीन्द न आने तक) नामस्मरण (जप)

करते रहना चाहिये। वैसे समयोंमें नाम जप रूप पवित्र कार्यमें मन को लगानेसे मनमें अन्य अपवित्र विचार नहीं उठ सकते हैं।

भजन-कीर्त न

प्रभुके गुणगानके पद उच्च स्वरसे अकेले गाने अथवा पाठ करनेसे भी बडा लाभ होता है। इसी प्रकारके पदों को जब कई व्यक्ति जोर जोरसे बार-बार साथ मिलकर बोलते हैं ता उसीको हरिकीर्त्त न या सकीर्त्त न कहा जाता है। यह भी बडा उपयोगी और लाभप्रद है। इससे व्यक्तिगत कल्याणके साथ ही साथ दूसरोंका भी कल्याण होता है। बोलनेवालों का मन और वाणी तो पवित्र होती ही है सुननेवाले भी पवित्र वाणीके श्रवण करनेसे पवित्र हो जाते हैं पवित्रता का वातावरण तैयार हो जाता है। यह तो प्रतिदिनका अनुभव है कि अच्छे वक्ता जब कोई करुण कहानी सुनाने लगते हैं तो कभी कभी उनके नेत्रों में भी आंसू आ जाते हैं। वेही जब वीर रस की बात करते तो वीरता से उनकी भुजायें फडक उठतीं, एक विचित्र जोश उमड आता है। विषय वासना की कथाएं वक्ताके मनमें कामुकता पैदा कर देती हैं। तो जो बात वक्ता को स्वय होती हैं व ही उनके श्रोताओंको भी हो जाती हैं। चतुर सेनापति अपने जोशीले भाषणसे सेनामें जोश उभाडकर उसे युद्ध आदिके लिए सन्नद्ध कर देते हैं। प्रभावशाली वक्ता मार्मिक व्याख्यानोंसे निष्ठुर श्रोताओंमें किसीके प्रति दयाका स्रोत बहा सकते हैं, पत्थरको मोम बना सकते हैं। भद्दे फिल्मी गाने आदि सुननेका ही तो प्रभाव है कि ब्रह्मचर्यकी रक्षा इतनी कठिन हो रही है। ऐसी अवस्थामें भक्ति, सद्‌गुण, सच्चरित्रताके गान अथवा पदपाठ वक्ता और श्रोता दोनोंका कितना अमित कल्याण करेंगे इसमें सन्देहका लेशमात्र

यावती द्यावापृथिवी वरिम्णा यावदापः सिष्यदुः। यावदग्निः ततस्त्वमसि ज्यायान् विश्वहा महाँस्तस्मै ते काम नम इत् कृणोमि ॥
अथर्व० ६।२।२०

जितने कुछ सूर्य और भूलोक अपने फैलावसे फैले हुए हैं, जहाँतक जलधारायें बहती हैं और जितना कुछ अग्नि वा विद्युत है उससे आप अधिक बड़े, सब प्रकारसे महान पूजनीय हैं, उस आपको ही हे कामना करने योग्य परमेश्वर, मैं नमस्कार करता हूं।

ज्यायान् निमिषतोऽसि तिष्ठतो ज्यायान्त्समुद्रादसि काम मन्यो। ततस्त्वमसि ज्यायान् विश्वहा महाँस्तस्मै ते काम नम इत् कृणोमि ॥
अथर्व० ६।२।२३

हे कामनायोग्य पूजनीय प्रभो, पलकें मारनेवाले मनुष्य, पशु, पक्षी आदिसे और स्थावर वृक्ष पर्वत आदिसे, आकाश और समुद्रसे आप अधिक बड़े हैं। सब प्रकारसे आप अधिक पूजनीय हैं, उस आपको ही मैं नमस्कार करता हूं।

न वै वातश्चन काममाप्नोति नाग्निः सूर्यो नोत चन्द्रमाः। ततस्त्वमसि ज्यायान् विश्वहा महाँस्तस्मै ते काम नम इत् कृणोमि ॥ अ० ६।२

न तो कोई वायु उस कामना योग्य परमेश्वरको प्राप्त होता है नहीं अग्नि और सूर्य और न चन्द्रमा प्राप्त हो सकते हैं। उन सबसे आप बड़े और पूजनीय हो। उस आपको ही मैं बार बार प्रणाम करता हूं।

नमः सायं नमः प्रातर्नमो रात्र्या नमो दिवा।
भवाय च शर्वाय चोभाभ्यामकरं नमः ॥ अथर्व० ११।२।१६

सायंकालमें उस प्रभुको नमस्कार है, प्रातःकालमें नमस्कार है, दिन और रातमें नमस्कार है, सुख देनेवाले और दुःखके नाश करनेवाले उस प्रभुको हम बार बार नमस्कार करते हैं।

प्रभु कहते हैं—

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः। अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा॥ अथर्व० ४।३०।१

मैं ज्ञानदाता दुःखनाशक एवं निवास देनेवाले पुरुषोंके साथ रहता हूं। मैं आदित्य ब्रह्मचारियों, प्राण और उदान वायुके समान सबके हितकारियों, पवन और अग्निके समान तेजस्वियों, तथा अध्यापकों एवं उपदेशकोंका पालन करता हू।

मया सोन्नमत्ति यो विपश्यति यः प्राणति य ईं शृणोत्युक्तम्। अमन्तवो मां त उपक्षियन्ति श्रुधि श्रुत श्रद्धेयं ते वदामि॥ अ०४।३०

मेरे द्वारा वही अन्न खाता है (अर्थात् सारे भोग्य पदार्थों को प्राप्त करता) जो भले प्रकार देखता है (सोच-विचारकर, अच्छे-बुरेका विवेक करके कार्य करता है), जिसमें प्राण है (बल, और साहस है) जो कहा हुआ सुनता है (वेदादि शास्त्रों का श्रवण करता एवं विद्वानों ज्ञानियों वा अनुभवी वृद्धोंके उपदेश सुनता है और तदनुकूल कार्य करता है)। मुझे किंवा मेरी आज्ञा नहीं माननेवाले मनुष्य दीनहीन होकर नष्ट हो जाते है। हे सुननेमें समर्थ जीव, तू सुन, तुझसे मैं श्रद्धाके योग्य वचन कहता हू।

अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्तवा उ। अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश॥ अथ० ४।३०।५

मैं ज्ञानदाता व दुःखके नाशक मनुष्य के हितके लिए और ब्रह्मज्ञानी, वेदपाठी विद्वानोंके द्वेषी हिंसकके मारनेके लिए ही धनुष तानता हूं (अर्थात् सत्पुरुषोंकी रक्षा और दुष्ट दुरात्माओंका नाश करता हू)। मैं भक्तजनके लिये पृथिवीको आनन्दसे पूर्ण करता हू। मैं सूर्य और पृथिवी लोकमें सब ओरसे प्रविष्ट हूं।

अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि संजयामि शाश्वतः। मां हवन्ते पितरो न जन्तवो अहं दाशुषे विभजामि भोजनम् ॥

मैं ही सारे धनरत्नोंका स्वामी हूं। मेरा ही उनपर सदासे पूरा अधिकार है। जीवगण मुझे पिता कहकर पुकारते और मुझसे सहायताकी याचना करते हैं। परन्तु मैं भोग्य पदार्थ उन्हींको देता हूं जो दूसरों को देते हैं (जो दानी और परोपकारी हैं)

ऊपरके चार मंत्रोंमें प्रभु कहते हैं कि मैं प्रार्थना उन्हीं मनुष्यों की सुनता हूं जो इन मंत्रोंमें लिखे ईश्वराज्ञाके अनुकूल अपने गुण कर्म स्वभावको बनाते हैं। निठल्ले बैठे शेखचिल्ली लोगोंकी प्रार्थना प्रभु नहीं सुनते।

द्यौष्ट्वा पिता पृथिवी माता जरामृत्युं कृणुतां संविदाने। यथा जीवा अदितेरुपस्थे प्राणापानाभ्यां गुपितः शतं हिमाः॥ अथर्व २।२८।४

परमेश्वर मनुष्य को आशीर्वाद देते हैं कि हे मनुष्य जैसे पुरुष अपनी मातासे उत्पन्न होकर उस माता की गोदमें स्थित रहता है और अपने पितासे पालन-पोषण को प्राप्त होता है, ऐसे ही पृथिवी रूपी मातासे उत्पन्न होकर, उस पृथिवीकी गोदमें रहता हुआ तू मनुष्य द्युलोक रूप पितासे पालन-पोषणको प्राप्त हो रहा है। द्युलोक और पृथिवी तेरे अनुकूल हुए, सौ वर्ष पर्यन्त जीनेमें सहायता करें। तू सारी आयुमें अच्छे-अच्छे कर्म करता हुआ, ब्रह्मज्ञान द्वारा मोक्ष सुखको प्राप्त हो।

आदर्श दिनचर्या

निद्रात्याग—प्रातःकाल ब्राह्ममुहूर्तमें अर्थात् सूर्योदयसे चार घड़ी (करीब डेढ़ घण्टा) पूर्व उठे। उठकर ईश्वर का चिन्तन करे। यह काल अमृत वेला है। इस समय शरीर इन्द्रिय, बुद्धि आदि स्वच्छ एवं निमल रहती हैं। इस समय उठनेसे स्वप्नदोष भी नहीं होता। निद्रात्यागके बाद जलसे कुल्ला करे, आंखों को और मुह को अच्छी तरह धोवे। इस समय जल पीना भी अत्यन्त लाभदायक है।

शौच निद्रा-त्यागके बाद मल त्याग कर देना अति आवश्यक है। मल त्याग करते समय जल्दबाजी नहीं करनी चाहिये। हाँ, जोर लगाकर मल को निकालने का यत्न करना भी वर्जित है। मलमूत्र की शंका को किसी समय भी नहीं रोकना चाहिये। बादमें हाथ पांव अच्छी तरह धाना चाहिये। कुल्ला भी करना चाहिये।

दन्तधावन- शौचादिके बाद दांतों की सफाई अत्यन्त आवश्यक है। दांतों की सफाईके लिये दतवन का ही उपयोग करना चाहिये। नीम की दतवन सबसे उत्तम होता है। साथ ही सेंधा नमक और सरसोंके तेलसे भी दांतों को मलना चाहिये। दांतोंके लिए देशी मंजन भी काममें लाया जा सकता है। दांतों को साफ करनेके बाद शुद्ध जलसे कुल्ला करना चाहिए। दिन-रातमें जब-जब भी जल स्पर्श करे गहरा कुल्ला अवश्य करे। आंखों का भी ठंडे जलसे धोवे। दांतों का सम्बन्ध मस्तिष्क तथा पेटसे है। इसलिए दांत तथा मुखकी सफाई पर विशेष रूपसे ध्यान देना चाहिये। जीभ पर भी मैल जमा न रहना चाहिये। सोनेसे पहिले भी मुह और दांत भली भांति साफ कर लेना चाहिये।

कुछ दांतोंमें सोने की खोली होनी भी आवश्यक है। मुखमें सोन

रहनेसे गंदगीके कीटाणु रहने नहीं पाते। सोनेके स्पर्शसे मुखमें बना हुआ रस पेटके भीतर जाकर पुष्टि और आरोग्य बढ़ाता है।

स्नान—शौच और मुख की सफाईके बाद स्नान करना चाहिये। स्नानसे अग्नि दीप्त होती है, बल और तेज की वृद्धि होती है। शरीर विमल और स्फूर्तियुक्त हो जाता है। स्नान प्रातःकाल सुर्योदयके पूर्व ही हो जाना चाहिये। शीतल जलसे ही स्नान करना उत्तम है, परन्तु यदि शीत अथवा अन्य किसी कारणसे कभी गरम जलसे स्नान करना हो तो सर पर गर्म जल कदापि न डालना चाहिये। गर्म जल मस्तिष्क एवं नेत्रोंके लिये हानिकारक है। मोट गमछे या तौलियेसे रगड़कर स्नान करना उचित है। घटिया साबुन कदापि न लगावे। गंगाजी की मिट्टी अथवा शुद्ध काली मिट्टी लगाके स्नान करे। नदीमें स्नान करना उत्तम है। नदी समीप न हो तो अन्यत्र भी पर्याप्त जलसे स्नान करे।

स्नान करनेके पहले शरीरमें तेल की मालिश करना स्वास्थ्यके लिये लाभदायक है। तेल की मालिशसे वातादि दोष दूर होते हैं, बुढ़ापा नहीं आता है, थकावट मिटती है, बल बढ़ता है एवं नींन्द अच्छी आती है। इससे चर्म रोग भी नहीं होते। सिरमें तेल मलनेसे मस्तिष्क और दृष्टि की शक्ति बढ़ती है। कानमें तेल डालनेसे कर्णरोग दूर होते हैं। पैरके तलवोंमें तेल मलनेसे भी दृष्टि शक्ति को लाभ पहुंचता है। इसलिये तेल को मालिश प्रति दिन करनी चाहिये।

सन्ध्योपासन—स्नानके बाद संन्ध्योपासन एवं ईश्वर चिन्तनमें रत हो जाना चाहिये। उपासना का अर्थ है समीप बैठना। ईश्वर की उपासना का अर्थ हुआ ईश्वरके समीप बैठना। ईश्वर सर्वव्यापक (सब जगह वर्तमान) एवं अन्तर्यामी (सबके भीतर प्रविष्ट) है। अतएव परमात्मा को अपने समीप अनुभव कर उससे अपने आत्मा को उच्च,

पवित्र और सद्गुण सम्पन्न बनाना ही उपासना का रहस्य है। जिससे सम्पूर्ण चराचर जगत् उत्पन्न हुआ, जो इस ब्रह्माण्ड का धारण और पालन कर रहा है, जो प्रभु सारे सुखके साधनों का देनेवाला है उसका स्तुति के द्वारा स्मरण करना मनुष्यमात्र का परम कर्त्तव्य है। परमात्मा की जो मनुष्यमात्रके लिए पुरुषार्थ करने की आज्ञा है उसपर चलकर सदैव कर्मशील रहनेवाले उपासकके परमप्रभु सदैव सहायक होंगे। सन्ध्योपासन एकान्त तथा खुले और पवित्र स्थानमें करना चाहिये।

सन्ध्या करते समय प्राणायाम का भी अभ्यास बढ़ाना चाहिये। जिस प्रकार स्थूल शरीरके लिए व्यायाम की आवश्यकता है उसी प्रकार मन और प्राणके लिए प्राणायाम की आवश्यकता है। प्राणायामके अभ्यास से दिन प्रतिदिन शान्ति एवं आयु बढ़ती है दोषों का क्षय होता है मन की एकाग्रता होती है एवं ज्ञान का प्रकाश बढ़ता है। अग्निहोत्र, बलि वैश्वदेव, पितृतर्पण एवं अतिथि सत्कार भी नित्य प्रति करना चाहिये।

व्यायाम—प्रति दिन अपनी शक्तिके अनुसार व्यायाम करना भी अति आवश्यक है। पुरुषार्थ करनेसे ही पुरुषार्थ बढ़ता है। व्यायाम से स्फूर्ति, क्रियाशक्ति तथा जठराग्नि की वृद्धि होती है। शरीर स्वस्थ, सबल, सुडौल और नीरोग रहता है। व्यायाम खुली हवामें करना उचित है।

भोजन—भोजन करनेसे पूर्व हाथ पांव मुह अच्छी तरह धो लेना चाहिये, तीन आचमन भी करना चाहिए। प्रथम भोजन ६ बजेसे १२ बजे तक कर लेना चाहिये। सायंकाल का भोजन ८ बजेसे पूर्व ही करना चाहिये। बीचमें आवश्यक हो तो फल आदि ले सकते हैं। भोजन शुद्ध, सात्विक एवं निरामिष होना चाहिये। ईश्वर का ध्यान कर भोजन में ही मन लगाकर स्वच्छ स्थानमें शान्त चित्तसे भोजन करना चाहिये।

प्रत्येक ग्रास को खूब चबा चबा कर खाना चाहिये। जल का सेवन भोजनके बीच में ही होना चाहिये। भोजनके अन्तमें जल पीना हानि-कारक है। भोजनके पश्चात् सौ कदम धीरे धीरे टहलना चाहिये। पीछे कुछ समय विश्राम करें। पश्चात् प्राणीमात्र की हित की भावना रखते हुए अपने-अपने कर्मोंमें लग जाना चाहिये। दिनमें सोना हानिकारक है।

दिनान्त कर्म—सायंकाल शौचादिसे निवृत्त होकर संध्योपासन करना चाहिये। भोजनोपरान्त ईश्वरके भजन कीर्तन एवं ज्ञान की चर्चा मित्रों एवं बालबच्चोंके सहित करनी चाहिये।

निद्रा—दिन भरके परिश्रम की थकावट निद्रासे ही दूर होती है और फिरसे नवीन शक्ति एवं स्फूर्ति की प्राप्ति होती है। इस लिये रात्रि जागरण कदापि नहीं करना चाहिये। रातमें छः सात घंटे सोना अत्यन्त आवश्यक है। ६॥ बजे रात तक अवश्य सो जाना चाहिये। सोते समय शान्त और प्रसन्नचित्त रहना चाहिये। शुभ संकल्पके भाव मनमें होने चाहिये। इस हेतु सोनेके पहिले परमात्मा का चिन्तन करना अति आवश्यक है। पृष्ठ ५७, ५८ पर लिखे शिवसंकल्प के छः वेदमंत्र अर्थचिन्तन पूर्वक पाठ करते हुए सो जाना बड़ा लाभप्रद हो सकता है। पूर्व अथवा दक्षिण सिर करके ही सोना लाभदायक है।

स्त्रीप्रसंग विषयसुखके लिये नहीं होना चाहिये। शास्त्र की मर्यादा के अनुसार ऋतुकालमें सन्तान की इच्छासे ही इसमें प्रवृत्त होना चाहिये। यह काम मध्यरात्रिके पूर्व ही होना चाहिये। कारण इससे जो थकावट होती है उसकी निवृत्ति पर्याप्त निद्रासे ही हो सकती है।

श्री गणेशाय नमः।

गजाननं भूतगणाधिसेवितम् कपित्थजम्बूफलचारुभक्षितम्।।
उमासुतं शोकविनाशकारकम् नमामि विघ्नेश्वर पादपंकजम्।।

संकट नाशन गणेश स्तोत्रम्।

नारद उवाच।

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम्।
भक्तावासं स्मरेन्नित्यमायुःकामार्थसिद्धये।।
प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम्।
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम्।।
लम्बोदरं पञ्चमं च षष्ठं विकटमेव च।
सप्तमं विघ्नराजं च धूम्रवर्णं तथाऽष्टमम्।।
नवमं भालचन्द्रं च दशमं तु विनायकम्।
एकादशं गणपतिं द्वादशं तु गजाननम्।।
द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः।
न च विघ्नभयं तस्य सर्वसिद्धिकरं प्रभो।।
विद्यार्थी लभते विद्यां धनार्थी लभते धनम्।
पुत्रार्थी लभते पुत्रान्मोक्षार्थी लभते गतिम्।।
जपेद्गणपतिस्तोत्रं षड्भिर्मासैः फलं लभेत्।
संवत्सरेण सिद्धिं च लभते नात्र संशयः।
अष्टाभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत्।
तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादतः।।

श्रीगणेशाय नमः।

अच्युताष्टकम्

अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम्।
श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचन्द्रं भजे ॥
अच्युतं केशवं सत्यभामाधवं माधवं श्रीधरं राधिकाराधितम्।
इन्दिरामन्दिरं चेतसा सुन्दरं देवकीनन्दनं नन्दजं संदधे ॥
विष्णवे जिष्णवे शंखिने चक्रिणे रुक्मिणीरागिणे जानकीजानये।
वल्लवीवल्लभायार्चितायात्मने कंसविध्वंसिने वंशिने ते नमः ॥
कृष्ण गोविन्द हे रामनारायण श्रीपते वासुदेवाजित श्रीनिधे।
अच्युतानंत हे माधवाधोक्षज द्वारकानायक द्रौपदीरक्षक ॥
राक्षसक्षोभितः सीतया शोभितो दण्डकारण्यभूपुण्यताकारणः।
लक्ष्मणेनान्वितो वानरैः सेवितोऽगस्त्यसंपूजितो राघवः पातुमाम् ॥
धेनुकारिष्टकोऽनिष्टकृद्द्वेषिणां केशिहा कंसहृद्वंशिकावादकः।
पूतनाकोपकः सूरजाखेलनो बालगोपालकः पातु मां सर्वदा।
विद्युदुद्योतवान्प्रस्फुरद्वाससं प्रावृडम्भोदवत्प्रोल्लसद्विग्रहम् ॥
वन्यया मालया शोभितोरःस्थलं लोहिताङ्घ्रिद्वयं वारिजाक्षं भजे।
कुञ्चितैः कुन्तलैर्भ्राजमानाननं रत्नमौलिं लसत्कुण्डलं गण्डयोः ॥
हारकेयूरकं कङ्कणप्रोज्ज्वलं किङ्किणीमञ्जुलं श्यामलं तं भजे।
अच्युतस्याष्टकं यः पठेदिष्टदं प्रेमतः प्रत्यहं पूरुषः सस्पृहम्।
वृत्ततः सुन्दरं कर्तृ विश्वम्भरं तस्य वश्यो हरिर्जायते सत्वरम्।

श्रीगणेशाय नमः।

आचार्यकृत षट्पदी

अविनयमपनय विष्णो दमयमनः शमय विषयमृगतृष्णाम्। भूतदयां

विस्तारय तारय संसारसागरतः। दिव्यधुनीमकरन्दे परिमलपरिभोग सच्चिदानन्दे। श्रीपतिपदारविन्दे भवभयखेदच्छिदे वन्दे। सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम्। सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः। उद्धृतनग नगभिदनुज दनुजकुलामित्र मित्रशशिदृष्टे। दृष्टे भवति प्रभवति न भवति किं भवतिरस्कारः। मत्स्यादिभिरवतारैरवतारवताऽवता सदा वसुधाम्। परमेश्वर परिपाल्यो भवता भवताप भीतोऽहम्। दामोदर गुणमंदिर सुन्दरवदनारविन्द गोविन्द। भवजलधिमथनमन्दर परमं दरमपनय त्वं मे। नारायण करुणामय शरणं करवाणि तावकौ चरणौ। इति षट्पदी मदीये वदनसरोजे सदा वसतु।

श्रीगणेशाय नमः।

श्री सूर्यकवचम्

श्री सूर्य उवाच।

साम्ब साम्ब महाबाहो शृणु मे कवचं शुभम्।
त्रैलोक्यमङ्गलं नाम कवचं परमाद्भुतम्॥
यज्ज्ञात्वा मन्त्रवित्सम्यक् फलं प्राप्नोति निश्चितम्।
यद्धृत्वा च महादेवो गणानामधिपोऽभवत्।
पठनाद्धारणाद्विष्णुः सर्वेषां पालकः सदा।
एवमिन्द्रादयः सर्वे सर्वैश्वर्यमवाप्नुयुः॥
कवचस्य ऋषिर्ब्रह्मा छन्दोऽनुष्टुबुदाहृतः।
श्रीसूर्यो देवता चात्र सर्वदेवनमस्कृतः।
यशआरोग्यमोक्षेषु विनियोगः प्रकीर्तितः।
प्रणवो मे शिरः पातु घृणिर्मे पातु भालकम्॥
सूर्योऽव्यान्नयनद्वन्द्वमादित्यः कर्णयुग्मकम्।

अष्टाक्षरो महामन्त्रः सर्वाभीष्टफलप्रदः ।
ह्रीं बीजं मे मुखं पातु हृदयं भुवनेश्वरी ॥
चन्द्रबिम्बं विशदाद्यं पातु मे गुह्यदेशकम् ।
अक्षरोऽसौ महामन्त्रः सर्वतन्त्रेषु गोपितः ॥
शिवो वह्निसमायुक्तो वामाक्षी विन्दुभूषितः ।
एकाक्षरो महामन्त्रः श्रीसूर्यस्य प्रकीर्तितः ।
गुह्याद्गुह्यतरो मन्त्रो वांच्छाचिन्तामणिः स्मृतः ॥
शीर्षादिपादपर्यन्तं सदा पातु मनूत्तमः ।
इति ते कथितं दिव्यं त्रिषु लोकेषु दुर्लभम् ॥
श्रीपदं कान्तिदं नित्यं धनारोग्यविवर्धनम् ।
कुष्ठादिरोगशमनं महाव्याधि विनाशनम् ॥
त्रिसंध्यं यः पठेन्नित्यं रोगी बलवान्भवेत् ।
बहुना किमिहोक्तेन यद्यन्मनसि वर्तते ॥
तत्तत्सर्वं भवेत्तस्य कवचस्य च धारणात् ।
भूतप्रेतपिशाचाश्च यक्षगन्धर्वराक्षसाः ।
ब्रह्मराक्षसवेताला न द्रष्टुमपि तं क्षमाः ।
दूरादेव पलायन्ते तस्य संकीर्तनादपि ॥
भूर्जपत्रे समालिख्य रोचनागुरुकुंकुमैः ।
रविवारे च संक्रान्त्यां सप्तम्यां च विशेषतः ॥
धारयेत्साधकश्रेष्ठः श्री सूर्यस्य प्रियो भवेत् ।
त्रिलोहमध्यगं कृत्वा धारयेद्दक्षिणे करे ।
शिखायामथवा कण्ठे सोपि सूर्यो न संशयः ॥
इति ते कथितं साम्ब त्रैलोक्यमङ्गलाभिधम् ।
कवचं दुर्लभं लोके तव स्नेहात्प्रकाशितम् ॥

अज्ञात्वा कवचं दिव्यं यो जपेत्सूर्यमुत्तमम्।
सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि ॥

पशुपत्यष्टकम्

श्रीगणेशाय नमः। पशुरवीन्दुपतिं धरणीपतिं भुजगलोकपतिं च सतीपतिम्। प्रणतभक्तजनार्तिहरं परं भजत रे मनुजा गिरिजापतिम्। न जनको जननी न च सोदरो न तनयो न च भूरिबलं कुलम्। अवति कोपि न कालवशंगतं ॥ भज० ॥ मुरजडिण्डिमवाद्यविलक्षणं मधुरपंचमनादविशारदम्। प्रथमभूतगणैरपि सेवितं ॥ भज० ॥ शरणदं सुखदं शरणान्वितं शिवशिवेति शिवेति नतं नृणाम्। अभयदं करुणा वरुणालयं ॥ भज० ॥ नरशिरोरचितं मणिकुण्डलं भुजगहारमुदं वृषभध्वजम्। चितिरजोधवलीकृतविग्रहं ॥ भज० ॥ मखविनाशकरं शशिशेखरं सततमध्वरभाजिफलप्रदम्। प्रलयदग्धसुरासुरमानवं ॥ भज० ॥ मदमपास्य चिरं हृदि संस्थितं मरणजन्मजराभयपीडितम्। जगदुदीक्ष्य समीपभयाकुलं ॥ भज० ॥ हरिविरंचिसुराधिपपूजितं यमजनेश धनेशनमस्कृतम्। त्रिनयनं भुवनत्रितयाधिपं ॥ भज० ॥ पशुपतेरिदमष्टकमद्भुतं विरचितं पृथिवीपतिसूरिणा। पठति संशृणुते मनुजः सदा शिवपुरीं वसते लभते मुदम्।

शिवमहिम्नः स्तोत्रम्

श्रीगणेशायनमः। महिम्नः पारं ते परमविदुषो यद्यसदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः। अथावाच्यः सर्वः स्वमति परिणामावधि गृणन् ममाप्येष स्तोत्रे हर निरपवादः परिकरः। अतीतः पन्थानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्यायं चकितमभिधत्ते श्रुतिरपि। स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः पदे त्वर्वाचीने

पतति न मनः कस्य न वचः। मधुस्फीता वाचः परममृतं निर्मितवतस्तव ब्रह्मन्किंवागपि सुरगुरोर्विस्मयपदम्। मम त्वेतां वाणीं गुणकथनपुण्येन भवतः पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता। तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्त्रयीवस्तुव्यस्तं तिसृषु गुणभिन्नासु तनुषु। अभव्यानामस्मिन्वरद रमणीयामरमणीं विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः। किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं किमाधारो धाता सृजति किमुपादान इति च। अतर्क्यैश्वर्ये त्वय्यनवसर दुस्थो हतधियः कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः। अजन्मानो लोकाः किमवयववन्तोऽपि जगतामधिष्ठातारं किं भवविधिरनादृत्य भवति। अनीशो वा कुर्याद्भुवनजनने कः परिकरो यता मन्दास्त्वां प्रत्यमरवर संशेरत इमे। त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति चारुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव। महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः कपालं चेतीयत्तव वरद तन्त्रोपकरणम्। सुरास्तां तामृद्धिं दधति तु भवद्भ्रूप्रणिहितां नहि स्वात्मारामं विषयमृगतृष्णा भ्रमयति। ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये। समस्तेऽप्येतस्मिन्पुरमथन तैर्विस्मित इव स्तुवञ्जिह्वेमि त्वां न खलु ननु धृष्टा मुखरता। तवैश्वर्यं यत्नाद्यदुपरि विरिञ्चो हरिरधः परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः। ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत् स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति। अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं दशास्यो यद्बाहूनभृत रणकण्डूपरवशान्। शिरः पद्मश्रेणी रचितचरणाम्भोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम्। अमुष्य त्वत्सेवासमधिगतसारं भुजवनं बलात्कैलासेऽपि त्वदधिवसतौ विक्रमयतः। अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठ

शिरसि प्रविष्ठा त्वय्यासीदुधृ धमुपचितो मुह्यति खलः। यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे बाण· परिजनविधेयत्रिभुवनः। न तच्चित्रं तस्मिन्वरिवसितरि त्वच्चरणयोर्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः। अकाण्डब्रह्माण्डक्षयचकित देवा सुरकृपाविधेय स्यासीधस्त्रिनयन विषं संहृतवतः। स कल्माषः कण्ठे तव न कुरुते न श्रियमहो विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिन.। असिद्धार्था नैव क्वचिदपि सदेवा· सुरनरे निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः। स पश्यन्नीश त्वामितरसुरसाधारणमभूत् स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः। मही पादाघाताद् व्रजति सहसा सशयपदं पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम्। मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा जगद्रक्षायै त्वं नटसि ननु वामैव विभुता। वियद्व्यापी तारागण गुणितफेनोद्गमरुचिः प्रवाहो वारां यः पृषतलघुदृष्ट. शिरसि ते। जगद्द्वीपाकारं जलधिवलयं तेन कृतमित्यनेनैवोन्नेय धृतमहिम दिव्यं तववपुः। रथ क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति। दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधिर्विधेयैः क्रीडन्त्यो न खलु परतंत्राः प्रभुधियः। हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम्। गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम्। क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते। अतस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं श्रुतौ श्रद्धां बध्वा दृढपरिकरः॰ कर्मसु जनः। क्रियादक्षो दक्ष. क्रतुपतिरधीशस्तनुभृतामृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः। क्रतुभ्रंषस्त्वत्तः क्रतुफलविधानव्यसनिनो ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः। प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं गतं रोहिद्भूतां रिरमयिषुमृष्यस्यवपुषा। धनुष्पाणेर्यातं दिवमपि

सपत्राकृतममुं त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः। स्वलावण्याशंसाधृतधनुष मह्नाय तृणवत्पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि। यदि स्त्रैणं देवी यमनिरतदेहार्धघटनादवैति त्वामद्धा बत वरद मुग्धा युवतयः। श्मशानेष्वाक्रीड़ा स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः। अमङ्गल्यं शीलं तव भवतु नामैवमखिलं तथाऽपिस्मर्तॄणां वरद परमं मङ्गलमसि। मनः प्रत्यक्चित्ते सविधमविधायत्तमरुतः प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः। यदालोक्याह्लादं ह्रद इव निमज्यामृतमये दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान्। त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च। परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि। त्रयीं तिस्रो वृत्तीस्त्रिभुवन मथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्ण विकृति। तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः समस्तव्यस्तं त्वां शरणद गृणात्योमिति पदम्। भवः, शर्वो रुद्रः पशुपतिरथोग्रः सह महांस्तथा भीमेशानाविति यद भिधानाष्टकमिदम्। अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुतिरपि प्रियायास्मैधाम्ने प्रणिहितनमस्योऽस्मि भवते। नमो नेदिष्ठाय प्रियदवदविष्ठाय च नमो नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः। नमो वर्षिष्ठाय त्रिनयनयविष्ठाय च नमो नमः सर्वस्मै ते तदिदमितिशर्वाय च नमः। बहलरजसे विश्वोत्पत्तौ भवाय नमोनमः प्रबलतमसे तत्संहारे हराय नमोनमः। जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः कृशपरिणति चेतः क्लेशवश्यं क्व चेदं क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः। इति चकितममन्दीकृत्य मां भक्तिराधाद्वरद चरणयोस्ते वाक्यपुष्पोपहारम्। असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे सुरतरुवरशाखा लेखनी पत्रमुर्वी। लिखति यदि

गृहीत्वा शारदो सर्वकालं तदपि तव गुणानामीश पारं न याति। असुर-सुर मुनीन्द्रैरर्चितस्येन्दुमौलेर्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य। सकलगुणवरिष्ठः पुष्पदन्ताभिधानो रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार। अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्पठति परमभक्त्या शुद्धचित्तः पुमान्यः। स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र प्रचुरतरधनायु पुत्रवान्कीर्तिमांश्च। महेशान्नापरो देवो महिम्नो नापरा स्तुति.। अघोरान्नापरो मन्त्रो नास्ति तत्वं गुरोः परम्। दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः। महिम्नस्तवपाठस्य फलां नार्हन्ति षोड़शीम्। कुसुमदशननामा सर्वगन्धर्व राजः शशिधरवरमौलेर्देवदेवस्यदासः। सगुरुनिजमहिम्नो भ्रष्ट एवास्य रोषात्स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः। सुरवरमुनिपूज्यं स्वर्गमोक्षैक हेतुं पठति यदि मनुष्य प्राञ्जलिर्नान्यचेता। व्रजति शिवसमीपं किन्नरैः स्तूयमानः स्तवनमिदममोघं पुष्पदन्तप्रणीतम्। श्रीपुष्पदन्तमुखपङ्कज निर्गतेन स्तोत्रेण किल्बिषहरेण हरिप्रियेण। कण्ठस्थितेन पठितेन समाहितेन सुप्रीणितो भवति भूतपतिर्महेशः। इत्येषा वाङ्मयी पूजा श्री मच्छङ्करपादयोः। अर्पिता तेन मे देवः प्रीयता च सदाशिवः।

रामस्तवराज

श्रीगणेशाय नमः। अस्य श्रीरामचन्द्रस्तवराजस्तोत्रमंत्रस्य। सनत्कुमार ऋषिः। श्रीरामो देवता। अनुष्टुप्छंदः। सीता बीजम्। हनुमान् शक्तिः। श्रीरामप्रीत्यर्थे जपे विनियोगः।

सूतउवाच।

सर्वशास्त्रार्थ तत्त्वज्ञं व्यासं सत्यवतीसुतम्।
धर्म पुत्रः प्रहृष्टात्मा प्रत्युवाच मुनीश्वरम्॥

विज्ञानहेतुं विमलायताक्षं प्रज्ञानरूपं स्वसुखैकहेतुम् ।
श्रीरामचन्द्रं हरिमादिदेवं परात्परं राममहं भजामि ॥
कविं पुराणं पुरुषं पुरस्तात्सनातनं योगिनमीशितारम् ।
अणोरणीयांसमनन्तवीर्यं प्राणेश्वरं राममसौ ददर्श ॥

नारदउवाच ।

नारायणं जगन्नाथमभिरामं जगत्पतिम् ।
कविं पुराणं वागीशं रामं दशरथात्मजम् ॥
राजराजं रघुवरं कौशल्यानंदवर्धनम् ।
भर्गं वरेण्यं विश्वेशं रघुनाथं जगद्गुरुम् ॥
सत्यं सत्यप्रियं श्रेष्ठं जानकीवल्लभं विभुम् ।
सौमित्रिपूर्वजं शांतं कामदं कमलेक्षणम् ॥
आदित्यं रविमीशानं घृणिं सूर्यमनायम् ।
आनन्दरूपिणं सौम्यं राघवं करुणामयम् ।
जामदग्निं तपोमूर्तिं रामं परशुधारिणम् ॥
वाक्पतिं वरदं वाच्यं श्रीपतिं पक्षिवाहनम् ।
श्रीशार्ङ्गधारिणं रामं चिन्मयानन्दविग्रहम् ॥
हलधृग्विष्णुमीशानं बलरामं कृपानिधिम् ।
श्रीवल्लभं कृपानाथं जगन्मोहनमच्युतम् ॥
मत्स्यकूर्मवराहादिरूपधारिणमव्ययम् ।
वासुदेवं जगद्योनिमनादिनिधनं हरिम् ॥
गोविन्दं गोपतिं विष्णुं गोपीजनमनोहरम् ।
गोगोपालपरीवारं गोपकन्यासमावृतम् ॥
विद्युत्पुंजप्रतीकाशं रामं कृष्णं जगन्मयम् ।
गोगोपिकासमीकीर्णं वेणुवादनतत्परम् ॥

कामरूपं कलावन्तं कामिनीकामदं विभुम्।
मन्मथं मथुरानाथं माधवं मकरध्वजम्॥
श्रीधरं श्रीकरं श्रीशं श्रीनिवासं परात्परम्।
भूतेशं भूपतिं भद्रं विभूतिं भूमिभूषणम्॥
सर्वदुःखहरं वीरं दुष्टदानववैरिणम्।
श्रीनृसिंहं महाबाहुं महान्तं दीप्ततेजसम्॥
चिदानन्दमयं नित्यं प्रणवं ज्योतिरूपिणम्।
आदित्यमंडलगतं निश्चितार्थस्वरूपिणम्॥
भक्तप्रियं पद्मनेत्रं भक्तानामीप्सितप्रदम्।
कौसलेयं कलामूर्तिं काकुत्स्थं कमलाप्रियम्॥
सिंहासने समासीनं नित्यव्रतमकल्मषम्।
विश्वामित्रप्रियं दान्तं स्वदारनियतव्रतम्॥
यज्ञेशं यज्ञपुरुषं यज्ञपालनतत्परम्।
सत्यसंधं जितक्रोधं शरणागतवत्सलम्॥
सर्वक्लेशापहरणं विभीषणवरप्रदम्।
दशग्रीवहरं रौद्रं केशवं केशिमर्दनम्॥
वालिप्रमथनं वीरं सुग्रीवेप्सितराज्यदम्।
नरवानरदेवैश्च सेवितं हनुमत्प्रियम्॥
शुद्धं सूक्ष्मं परं शांतं तारकब्रह्मरूपिणम्।
सर्वभूतात्मभूतस्थं सर्वाधारं सनातनम्॥
सर्वकारणकर्तारं निदानं प्रकृतेः परम्।
निरामयं निराभासं निरवद्यं निरञ्जनम्॥
नित्यानंदं निराकारमद्वैतं तमसः परम्।
परात्परतरं तत्त्वं सत्यानंदं चिदात्मकम्॥

मनसा शिरसा नित्यं प्रणमामि रघूत्तमम्।
सूर्यमण्डलमध्यस्थं रामं सीतासमन्वितम्॥
नमामि पुंडरीकाक्षममेयं गुरुतत्परम्।
नमोस्तु वासुदेवाय ज्योतिषां पतये नमः॥
नमोस्तु रामदेवाय जगदानंदरूपिणे।
नमो वेदांतनिष्ठाय योगिने ब्रह्मवादिने॥
मायामयनिरासाय प्रपन्नजनसेविने।
वंदामहे महेशानचंडकोदण्डखण्डनम्॥
जानकीहृदयानन्दवर्धनं रघुनन्दनम्।
उत्फुल्लामलकोमलोत्पलदलश्यामाय रामाय ते
कामाय प्रमदामनोहरगुणग्रामाय रामात्मने॥
योगारूढमुनींद्रमानससरोहंसाय संसारविध्वंसाय
स्फुरदोजसे रघुकुलोत्तंसाय पुंसे नमः।
भवोद्भवं वेदविदांवरिष्ठमादित्यचन्द्रानलसुप्रभावम्।
सर्वात्मकं सर्वगतस्वरूपं नमामि रामं तमसः परस्तात्॥
निरञ्जनं निष्प्रतिमं निरीहं निराश्रयं निष्कलमप्रपंचम्।
नित्यं ध्रुवं निर्विषयस्वरूपं निरन्तरं राममहं भजामि॥
भवाब्धिपोतं भरताग्रजं तं भक्तप्रियं भानुकुलप्रदीपम्।
भूतत्रिनाथं भुवनाधिपं तं भजामि रामं भवरोगवैद्यम्॥
सर्वाधिपत्यं समरांगधीरं सत्यं चिदानन्दमयस्वरूपम्।
सत्यं शिवं शान्तिमयं शरण्यं सनातनं राममहं भजामि।
कार्यक्रियाकारणमप्रमेयं कविं पुराणं कमलायताक्षम्॥
कुमारवेद्यं करुणामयं तं कल्पद्रुमं राममहं भजामि।
त्रैलोक्यनाथं सरसीरुहाक्षं दयानिधिं द्वन्द्वविनाशहेतुम्॥

महाबलं वेदविधिं सुरेशं सनातनं राममहं भजामि ।
वेदान्तवेद्यं कविमीशितारमनादिमध्यान्तमचिन्त्यमाद्यम् ॥
अगोचरं निर्मलमेकरूपं नमामि रामं तमसः परस्तात् ।
अशेषवेदात्मकमादिसंज्ञमजं हरिं विष्णुमनन्तमाद्यम् ॥
अपारसंवित्सुखमेकरूपं परात्परं राममहं भजामि ।
तत्त्वस्वरूपं पुरुषं पुराणं स्वतेजसा पूरितविश्वमेकम् ॥
राजाधिराजं रविमण्डलस्थं विश्वेश्वरं राममहं भजामि ।
लोकाभिरामं रघुवंशनाथं हरिं चिदानन्दमयं मुकुन्दम् ॥
अशेषविद्याधिपतिं कवीन्द्रं नमामि रामं तमसः परस्तात् ।
योगीन्द्रसंघैश्च सुसेव्यमानं नारायणं निर्मलमादिदेवम् ॥
नतोऽस्मि नित्यं जगदेकनाथमादित्यवर्णं तमसः परस्तात् ।
विभूतिदं विश्वसृजं विरामं राजेन्द्रमीशं रघुवंशनाथम् ॥
अचिन्त्यमव्यक्तमनंतमूर्तिं ज्योतिर्मयं राममहं भजामि ।
अशेषसंसारविहारहीनमादित्यगं पूर्णसुखाभिरामम् ॥
समस्तसाक्षिं तमसः परस्तान्नारायणं विष्णुमहं भजामि ।
मुनीन्द्रगुह्यं परिपूर्णकामं कलानिधिं कल्मषनाशहेतुम् ॥
परात्परं यत्परमं पवित्रं नमामि रामं महतो महान्तम् ।
ब्रह्मा विष्णुश्च रुद्रश्च देवेंद्रो देवतास्तथा ॥
आदित्यादिग्रहाश्चैव त्वमेव रघुनन्दन ।
तापसा ऋषयः सिद्धाः साध्याश्च मरुतस्तथा ॥
विप्रा वेदास्तथा यज्ञाः पुराणधर्मसंहिताः ।
वर्णाश्रमास्तथा धर्मा वर्णधर्मास्तथैव च ॥
यक्षराक्षसगंधर्वा दिक्पाला दिग्गजादयः ।
सनकादिमुनिश्रेष्ठास्त्वमेव रघुपुंगव ॥

वसवोष्टौ त्रयः काला रुद्रा एकादश स्मृताः।
तारका दशदिक् चैव त्वमेव रघुनन्दन ॥
सप्तद्वीपाः समुद्राश्च नगा नद्यस्तथा द्रुमाः।
स्थावरा जंगमाश्चैव त्वमेव रघुनायक ॥
देवतिर्यङ्मनुष्याणां दानवानां तथैव च।
मातापिता तथा भ्राता त्वमेव रघुवल्लभ ॥
सर्वेषां त्वं परं ब्रह्म त्वन्मयं सर्वमेव हि।
त्वमक्षरं परं ज्योतिस्त्वमेव पुरुषोत्तम ॥
त्वमेव तारकं ब्रह्म त्वत्तोऽन्यन्नैव किंचन।
शान्तं सर्वगतं सूक्ष्मं परंब्रह्म सनातनम् ॥
राजीवलोचनं रामं प्रणमामि जगत्पतिम्।

व्यास उवाच।

ततः प्रसन्नः श्रीरामः प्रोवाच मुनिपुंगवम्।
तुष्टोऽस्मि मुनिशार्दूल वृणीष्व वरमुत्तमम् ॥

नारद उवाच।

यदि तुष्टोऽसि सर्वज्ञ श्रीराम करुणानिधे।
त्वन्मूर्तिदर्शनेनैव कृतार्थोऽहं च सर्वदा ॥
धन्योऽहं कृतकृत्योऽहं पुण्योऽहं पुरुषोत्तम।
अद्य मे सफलं जन्म जीवितं सफलं च मे ॥
अद्य मे सफलं ज्ञानमद्य मे सफलं तपः।
अद्य मे सफलं कर्म त्वत्पादांभोजदर्शनात् ॥
अद्य मे सफलं सर्वं त्वन्नामस्मरणं तथा।
त्वत्पादांभोरुहद्वन्द्वसद्भक्तिं देहि राघव ॥
ततः परमसंप्रीतः स रामः प्राह नारदम्।

श्रीरामउवाच ।

मनुष्यर्व महाभाग मुने त्विष्टं ददामि ते ।
यत्त्वया चेप्सितं सर्वं मनसा तद्भविष्यति ॥

नारदउवाच ।

वरं न याचे रघुनाथ युष्मत्पादाब्जभक्तिः सततं ममास्तु ।
इदं प्रियं नाथ वरं प्रयाचे पुनः पुनस्त्वामिदमेव याचे ॥

व्यासउवाच ।

इत्येवमीडितो रामः प्रादात्तस्मै वरांतरम् ।
वीरो रामो महातेजाः सच्चिदानन्दविग्रहः ॥
अद्वैतममलं ज्ञानं स्वनामस्मरण तथा।
अन्तर्दधौ जगन्नाथः पुरतस्तस्य राघवः ॥
इति श्रीरघुनाथस्य स्तवराजमनुत्तमम् ।
सर्वसौभाग्यसपत्तिदायकं मुक्तिदं शुभम् ॥
कथितं ब्रह्मपुत्रेण वेदानां सारमुत्तमम् ।
गुह्याद्गुह्यतमं दिव्य तव स्नेहात्प्रकीर्तितम् ॥
यः पठेच्छृणुयाद्वापि त्रिसंध्यं श्रद्धयान्वितः ।
ब्रह्महत्यादिपापानि तत्समानि बहूनि च ॥
स्वर्णस्तेयं सुरापानं गुरुतल्पगतिस्तथा ।
गोवधाद्युपपापानि अनृतात्संभवानि च ॥
सर्वैः प्रमुच्यते पापैः कल्पायुतशतोद्भवैः ।
मानसं वाचिकं पापं कर्मणा समुपार्जितम् ॥
श्रीरामस्मरणेनैव तत्क्षणान्नश्यति ध्रुवम् ।
इदं सत्यमिदं सत्यं सत्यमेतदिहोच्यते ॥
रामं सत्यं परं ब्रह्म रामात्किंचिन्न विद्यते ।
तस्माद्रामस्वरूपं हि सत्यं सत्यमिदं जगत् ॥

श्रीरामचन्द्र रघुपुंगव राजवर्य।
राजेन्द्र राम रघुनायक राघवेश।
राजाधिराज रघुनन्दन रामचन्द्र।
दासोऽहमद्य भवतः शरणागतोऽस्मि।
वैदेहीसहितं सुरद्रुमतले हैमे महामंडपे।
मध्ये पुष्पकृतासने मणिमये वीरासने संस्थितम्।
अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनीन्द्रैः परं
व्याख्यातं भरतादिभिः परिवृतं रामं भजे श्यामलम्।
रामं रत्नकिरीटकुंडलयुतं केयूरहारान्वितं
सीतालंकृतवामभागममलं सिंहासनस्थं विभुम्।
सुग्रीवादिहरीश्वरैः सुरगणैः संसेव्यमानं सदा
विश्वामित्रपराशरादिमुनिभिः संस्तूयमानं प्रभुम्।
सकलगुणनिधानं योगिभिः स्तूयमानं
भुजविजितसमानं राक्षसेन्द्रादिमानम्।
महितनृपभयानं सीतया शोभमानं
स्मरहृदयविमानं ब्रह्म रामाभिधानम्।
रघुवर तव मूर्तिर्मामके मानसाब्जे
नरकगतिहरं ते नामधेयं मुखे मे।
अनिशमतुलभक्त्या मस्तकं त्वत्पदाब्जे
भवजलनिधिमग्नं रक्ष मामार्तबंधो।
रामरत्नमहं वंदे चित्रकूटपतिं हरिम्।
कौसल्याभक्तिसंभूतं जानकीकंठभूषणम्।

इति श्री सनत्कुमार संहितायां नारदोक्तं श्रीरामचन्द्रस्तवराजस्तोत्रं सम्पूर्णम्।

सावित्रीव्रतोपाख्यान

युधिष्ठिर उवाच

पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।
किं जप्यं जपतो नित्यं भवेद्धर्मफलं महत् ॥ १ ॥
प्रस्थाने वा प्रवेशे वा प्रवृत्ते वापि कर्मणि ।
दैवे वा श्राद्धकाले वा किं जप्यं कर्मसाधनम् ॥
शान्तिकं पौष्टिकं रक्षा शत्रुघ्नं भयनाशनम् ।
जप्यं यद्‌ब्रह्मसमितं तद्भवान् वक्तुमर्हति ॥

भीष्म उवाच

व्यासप्रोक्तमिमं मन्त्रं शृणुष्वैकमना नृप ।
सावित्र्या विहितं दिव्यं सद्यः पापविमोचनम् ॥
शृणु मन्त्रविधिं कृत्स्नं प्रोच्यमानं मयाऽनघ ।
यं श्रुत्वा पाण्डवश्रेष्ठ सर्वपापैः प्रमुच्यते ॥
रात्रावहनि धर्मज्ञ जपन् पापैर्न लिप्यते ।
तत्तेऽहं संप्रवक्ष्यामि शृणुष्वैकमना नृप ॥
आयुष्मान् भवते चैव यं श्रुत्वा पार्थिवात्मज ।
पुरुषस्तु सुसिद्धार्थः प्रेत्य चेह च मोदते ॥
सेवितं सततं राजन् पुरा राजर्षिसत्तमैः ।
क्षत्रधर्मपरैर्नित्यं सत्यव्रतपरायणैः ॥
इदमाह्निकमव्यग्रं कुर्वद्भिर्नियतैः सदा ।
नृपैर्भरतशार्दूल प्राप्यते श्रीरनुत्तमा ॥
नमो वशिष्ठाय महाव्रताय पराशरं वेदनिधिं नमस्ये ।
नमोऽस्त्वनन्ताय महोरगाय नमोऽस्तु सिद्धेभ्य इहाक्षयेभ्यः

नमोऽस्त्वृषिभ्यः परमं परेषां देवेषु देवं वरदं वराणाम् ।

सहस्रशीर्षाय नमःशिवाय सहस्रनामाय जनार्दनाय ॥

अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः ।

ऋतश्च पितृरूपश्च त्र्यम्बकश्च महेश्वरः ॥

वृषाकपिश्च शम्भुश्च हवनोऽथेश्वरस्तथा ।

एकादशैते प्रथिता रुद्रास्त्रिभुवनेश्वराः ॥

शतमेतत्समाम्नातं शतरुद्रे महात्मनाम् ।

अंशो भगश्च मित्रश्च वरुणश्च जलेश्वरः ॥

तथा धातार्यमा चैव जयन्तो भास्करस्तथा ।

त्वष्टा पूषा तथैवेन्द्रो द्वादशो विष्णुरुच्यते ॥

इत्येते द्वादशादित्या काश्यपेया इति श्रुतिः ।

धरो ध्रुवश्च सोमश्च सावित्रोथानिलोऽनलः ॥

प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ।

नासत्यश्चापि दस्रश्च स्मृतौ द्वावश्विनावपि ॥

मार्तण्डस्यात्मजावेतौ संज्ञानासाविनिर्गतौ ।

अतः परं प्रवक्ष्यामि लोकानां कर्मसाक्षिणः ॥

अपि यज्ञस्य वेत्तारो दत्तस्य सुकृतस्य च ।

अदृश्याः सर्वभूतेषु पश्यन्ति त्रिदशेश्वराः

शुभाशुभानि कर्माणि मृत्युः कालश्च सर्वशः ।

विश्वेदेवाः पितृगणा मूर्तिमन्तस्तपोधनाः ॥ २० ॥

मुनयश्चैव सिद्धाश्च तपोमोक्षपरायणाः ।

शुचिस्मिताः कीर्तयतां प्रयच्छन्ति शुभं नृणाम् ॥

प्रजापतिकृतानेतान् लोकान् दिव्येन तेजसा ।

वसन्ति सर्वलोकेषु प्रयताः सर्वकर्मसु ॥

प्राणानामीश्वरानेतान् कीर्तयन्प्रयतो नरः ।
धर्मार्थकामैर्विपुलैर्युज्यते सह नित्यशः ॥
लोकांश्च लभते पुण्यान्विश्वेश्वरकृताञ्छुभान् ।
एते देवास्त्रयस्त्रिंशत्सर्वभूतगणेश्वराः ।
नन्दीश्वरो महाकायो ग्रामणीर्वृषभध्वजः ।
ईश्वराः सर्वलोकानां गणेश्वरविनायकाः ॥
सौम्या रौद्रा गणाश्चैव योगभूतगणास्तथा ।
ज्योतींषि सरितो व्योम सुपर्णः पतगेश्वरः ॥
पृथिव्यां तपसा सिद्धाः स्थावराश्च चराश्च ह ।
हिमवान् गिरयः सर्वे चत्वारश्च महार्णवाः ॥
भवस्यानुचराश्चैव हरतुल्यपराक्रमाः ।
विष्णुर्देवोथ जिष्णुश्च स्कन्दश्चाम्बिकया सह ॥
कीर्तयन्प्रयतः सर्वान्सर्वपापैः प्रमुच्यते ।
अत ऊर्ध्वं प्रवक्ष्यामि मानवानृषिसत्तमान् ॥
यवक्रीतश्च रैभ्यश्च अर्वावसुपरावसू ।
औशिजश्चैव कक्षीवान् बलश्चाङ्गिरसःसुतः ॥
ऋषिर्मेधातिथेः पुत्रः कण्वो बर्हिषदस्तथा ।
ब्रह्मतेजोमयाः सर्वे कीर्तिता लोकभावनाः ॥
लभन्ते हि शुभं सर्वे रुद्रानलवसुप्रभाः ।
भुवि कृत्वा शुभं कर्म मोदन्ते दिवि दैवतैः ॥
महेन्द्रगुरवः सप्त प्राचीं वै दिशमाश्रिताः ।
प्रयतः कीर्तयेदेतान् शक्रलोके महीयते ॥
उन्मुचुः प्रमुचुश्चैव स्वस्त्यात्रेयश्च वीर्यवान् ।
दृढव्यश्चोर्ध्वबाहुश्च तृणसोमाङ्गिरास्तथा ॥

मित्रावरुणयोः पुत्रस्तथागस्त्यः प्रतापवान् ।
धर्मराजर्त्विजः सप्त दक्षिणां दिशमाश्रिताः ॥
दृढ़ेयुश्च ऋतेयुश्च परिव्याधश्च कीर्तिमान् ।
एकतश्च द्वितश्चैव त्रितश्चादित्यसन्निभाः ॥
अत्रः पुत्रश्च धर्मात्मा ऋषिः सारस्वतस्तथा ।
वरुणस्यर्त्विजः सप्त पश्चिमां दिशमाश्रिताः ॥
अत्रिर्वसिष्ठो भगवान् कश्यपश्च महानृषिः ।
गौतमश्च भरद्वाजो विश्वामित्रोऽथ कौशिकः ॥
ऋचीकतनयश्चोग्रो जमदग्निः प्रतापवान् ।
धनेश्वरस्य गुरवः सप्तैते उत्तराश्रिताः ॥
अपरे मुनयः सप्त दिक्षु सर्वास्वधिष्ठिताः ।
कीर्तिस्वस्तिकरा नृणां कीर्तिता लोकभावनाः ॥ ४० ॥
धर्मः कामश्च कालश्च वसुर्वासुकिरेव च ।
अनन्तः कपिलश्चैव सप्तैते धरणीधराः ॥
रामो व्यासस्तथा द्रौणिरश्वत्थामा च लोमशः ।
इत्येते मुनयो दिव्या एकैकः सप्त सप्तधा ॥
शान्तिस्वस्तिकरा लोके दिशांपालाः प्रकीर्तिताः ।
यस्यां यस्यां दिशि ह्येते तन्मुखः शरणं व्रजेत् ॥
स्रष्टारः सर्वभूतानां कीर्तिता लोकपावनाः ।
संवर्तो मेरुसावर्णो मार्कण्डेयश्च धार्मिकः ॥
सांख्ययोगौ नारदश्च दुर्वासा महानृषिः ।
अत्यन्ततपसो दान्तास्त्रिषु लोकेषु विश्रुताः ॥
अपरे रुद्रसङ्काशाः कीर्तिता महालौकिकाः ।
अपुत्रो लभते पुत्रं दरिद्रो लभते धनम् ॥

तथा धर्मार्थकामेषु सिद्धिं च लभते नर ।
पृथुं वैन्यं नृपवरं पृथ्वी यस्याभवत्सुता ॥
प्रजापतिं सार्वभौमं कीर्तयेद्वसुधाधिपम् ।
आदित्यवंशप्रभवं महेन्द्रसमविक्रमम् ॥
पुरूरवसमैलं च त्रिषु लोकेषु विश्रुतम् ।
बुधस्य दयितं पुत्रं कीर्तयेद्वसुधाधिपम् ॥
त्रिलोकविश्रुतं वीरं भरतं च प्रकीर्तयेत् ।
गवामयेन यज्ञेन येनेष्टं वै कृते युगे ॥
रन्तिदेवं महादेवं कीर्तयेत्परमद्युतिम् ।
विश्वजित्तपसोपेतं लक्षण्यं लोकपूजितम् ॥
तथा श्वेतं च राजर्षिं कीर्तयेत्परमद्युतिम् ।
सगरस्यात्मजा येन प्लाविताःस्तारितास्तथा ॥
हुताशनसमानेतान् महारूपान् महौजस ।
उग्रकायान्महासत्त्वान्कीर्तयेत्कीर्तिवर्धनान् ॥
देवानृषिगणाश्चैव नृपाश्च जगतीश्वरान् ।
सांख्यं योगं च परमं हव्यं कव्यं तथैव च ॥
कीर्तितं परमं ब्रह्म सर्वश्रुतिपरायणम् ।
मङ्गल्यं सर्वभूतानां पवित्रं बहुकीर्तितम् ॥
व्याधिप्रशमनं श्रेष्ठं पौष्टिकं सर्वकर्मणाम् ।
प्रयत कीर्तयेच्चैतान् कल्यं सायं च भारत ॥
एते वै यान्ति वर्षन्ति भान्ति वान्ति सृजन्ति च ।
एते विनायका श्रेष्ठा दक्षा क्षान्ता जितेन्द्रिया. ॥
नराणामशुभं सर्वे व्यपोहन्ति प्रकीर्तिता ।
साक्षिभूता महात्मान पापस्य सुकृतस्य च ॥

एतान्वै कल्यमुत्थाय कीर्तयन् शुभमश्नुते ।
नाग्निचौरभयं तस्य न मार्गप्रतिरोधनम् ॥
एतान् कीर्तयतां नित्यं दुःस्वप्नो नश्यते नृणाम् ।
मुच्यते सर्वपापेभ्यः स्वस्तिमांश्च गृहान् व्रजेत् ॥ ६० ॥
दीक्षाकालेषु सर्वेषु यः पठेन्नियतो द्विजः ।
न्यायवानात्मनिरतः क्षान्तो दान्तोऽनसूयकः ॥
रोगार्तो व्याधियुक्तो वा पठन् पापात्प्रमुच्यते ।
वास्तुमध्ये तु पठतः कुले स्वस्त्ययनं भवेत् ॥
क्षेत्रमध्ये तु पठतः सर्वं सस्यं प्ररोहति ।
गच्छतः क्षेममध्वानं ग्रामान्तरगतः पठन् ॥
आत्मनश्च सुतानां च दाराणां च धनस्य च ।
बीजानामोषधीनां च रक्षामेतां प्रयोजयेत् ॥
एतान् संग्रामकाले तु पठतः क्षत्रियस्य तु ।
व्रजन्ति रिपवो नाशं क्षेमं च परिवर्तते ॥
एतान्दैवे च पित्र्ये च पठतः पुरुषस्य हि ।
भुञ्जते पितरः कव्यं हव्यं च त्रिदिवौकसः ॥
न व्याधिश्वापदभयं न द्विपान्न हि तस्करात् ।
कश्मलं लघुतां याति पाप्मना च प्रमुच्यते ॥
यानपात्रे च याने च प्रवासे राजवेश्मनि ।
परां सिद्धिमवाप्नोति सावित्रीं ह्युत्तमां पठन् ॥
न च राजभयं तेषां न पिशाचान्न राक्षसात् ।
नाग्न्यम्बुपवनव्यालाद्भयं तस्योपजायते ॥
चतुर्णामपि वर्णानामाश्रमस्य विशेषतः ।
करोति सततं शान्तिं सावित्रीमुत्तमां पठन् ॥

नाग्निर्दहति काष्ठानि सावित्री यत्र पठ्यते ।
न तत्र बालो म्रियते न च तिष्ठन्ति पन्नगाः ॥
न तेषां विद्यते दुःखं गच्छन्ति परमां गतिम् ।
ये शृण्वन्ति महद्ब्रह्म सावित्रीगुणकीर्तनम् ॥
गवां मध्ये तु पठतो गावोऽस्य बहुवत्सलाः ।
प्रस्थाने वा प्रवासे वा सर्वावस्थां गतः पठेत् ॥
जपतां जुह्वतां चैव नित्यं च प्रयतात्मनाम् ।
ऋषीणां परमं जप्यं गुह्यमेतन्नराधिप ॥
याथातथ्येन सिद्धस्य इतिहासं पुरातनम् ।
पराशरमतं दिव्यं शक्राय कथितं पुरा ॥
तदेतत्ते समाख्यातं तथ्यं ब्रह्म सनातनम् ।
हृदयं सर्वभूतानां श्रुतिरेषा सनातनी ॥
सोमादित्यान्वयाः सर्वे राघवाः कुरवस्तथा ।
पठन्ति शुचयो नित्यं सावित्रीं प्राणिनां गतिं ॥
अभ्यासे नित्यं देवानां सप्तर्षीणां ध्रुवस्य च ।
मोक्षणं सर्वकृच्छ्राणां मोचयत्यशुभात्सदा ॥
वृद्धैः काश्यपगौतमप्रभृतिभिर्भृग्वंगिरो ... ...
शुक्रागस्त्यबृहस्पतिप्रभृतिभिर्ब्रह्मर्षिभिः सेवितम् ।
भारद्वाजमतं ऋचीकतनयैः प्राप्तं वसिष्ठात् पुनः ।
सावित्रीमधिगम्य शक्रवसुभिः कृत्स्ना जिता दानवाः ॥
यो गोशतं कनकशृङ्गमयं ददाति
विप्राय वेदविदुषे च बहुश्रुताय ।
दिव्यां च भारतकथां कथयेच्च नित्यं
तुल्यं फलं भवति तस्य च तस्य चैव ॥ ८० ॥

धर्मो विवर्धति भृगोः परिकीर्तनेन
वीर्यं विवर्धति वसिष्ठनमोनतेन।
संग्रामजिद्भवति चैव रघुं नमस्यन्
स्यादश्विनौ च परिकीर्तयतो न रोगः॥
एषा ते कथिता राजन् सावित्री ब्रह्म शाश्वती।
विवक्षुरसि यचान्यत्तत्ते वक्ष्यामि भारत॥ ८२॥

विष्णुसहस्रनाम

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्॥
यस्यस्मरणमात्रेण जन्मसंसारबन्धनात्
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे।
नमः समस्तभूतानामादिभूताय भूभृते
अनेकरूपरूपाय विष्णवे प्रभविष्णवे।

वैशम्पायन उवाच

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः।
युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत॥ १॥

युधिष्ठिर उवाच

किमेकं दैवतं लोके किं वाप्येकं परायणम्।
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम्॥
को धर्मः सर्वधर्माणां भवतः परमो मतः।
किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धनात्॥

भीष्म उवाच

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम्।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः॥
तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम्।
ध्यायंस्तुवन्नमस्यंश्च यजमानस्तमेव च॥
अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम्।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत्॥
ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम्।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम्॥
एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा॥
परमं यो महत्तेजः परमं यो महत्तपः।
परमं यो महद्ब्रह्म परमं यः परायणम्॥
पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम्।
दैवतं देवतानां च भूतानां योऽव्ययः पिता॥
यतः सर्वाणि भूतानि भवन्त्यादियुगागमे।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये॥
तस्य लोकप्रधानस्य जगन्नाथस्य भूपते।
विष्णोर्नामसहस्रं मे शृणु पापभयापहम्॥
यानि नामानि गौणानि विख्यातानि महात्मनः।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये॥
ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः॥
पूतात्मा परमात्मा च मुक्तानां परमा गतिः।

सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥
असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ।
सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः ॥ ४० ॥
वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥
सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥
ओजस्तेजो द्युतिधरः प्रकाशात्मा प्रतापनः ।
ऋद्धःस्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ॥
अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः ।
औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥
भूतभव्यभवन्नाथः पवनःपावनोऽनलः ।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः ॥
युगादिकृद्युगावर्तो नैकमायो महाशनः ।
अदृश्योऽव्यक्तरूपश्च सहस्रजिदनन्तजित् ॥
इष्टो विशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः ।
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥
अच्युतः प्रथितःप्राणः प्राणदो वासवानुजः ।
अपां निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥
स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ॥
अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ॥
पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ।

महर्षिर्भूद्रो वृद्धात्मा महाक्षो गरुडध्वजः ॥
अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान्समितिंजयः ॥
विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।
महीधरो महाभागो वेगवानमिताशनः ॥
उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता विकर्ता गहनो गुहः ॥
व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥
रामो विरामो विरजो मार्गो नेयो नयोऽनयः ।
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥
वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥
ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥
विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययम् ।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥
अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ॥ ६० ॥
यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥
सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥
स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।

वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥
धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥
गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ॥
सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः ।
विनयो जयः सत्यसन्धो दाशार्हः सात्वतां पतिः ॥
जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः ।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ॥
अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः ॥
महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् ॥
महावराहो गोविन्दः सुषेणः कनकाङ्गदी ।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥
वेधाः स्वाङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युतः ॥
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥
भगवान्भगहा नन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥
सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।
दिविस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥
त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ।

संन्यासकृच्छमःशान्तो निष्ठा शान्तिः परायणं ॥
शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥
अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ॥
श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ।
श्रीधरः श्रीकरः श्रेयः श्रीमाँल्लोकत्रयाश्रयः ॥
स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ।
विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥
उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतः स्थिरः ।
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ॥ ८० ॥
अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः ।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥
कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥
कामदेवः कामपालः कामी कान्तः कृतागमः ।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः ॥
ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥
महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥
स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिस्तोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥
मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।

वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥
सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥
भूतावासो वासुदेवः सर्वासुनिलयोऽनलः।
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥
विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान्।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥
एको नैकः सवः कः किं यत्तत्पदमनुत्तमम्।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ॥
सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी।
वीरहा विषमः शून्यो घृताशीरचलश्चलः ॥
अमानो मानदो मान्यो लोकस्वामी त्रिकोलकधृत्।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥
तेजो वृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकश्रृङ्गो गदाग्रजः ॥
चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥
समावर्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥
शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥
उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः।
अर्को वाजसनः श्रृङ्गी जयन्तः सर्वविज्जयी ॥
सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः।

महाह्रदो महागर्तो महाभूतो महानिधिः ॥
कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः ।
अमृताशोऽमृतवपु, सर्वज्ञः सर्वतोमुखः ॥ १०० ॥
सुलभ. सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥
सहस्रार्चिः सप्तजिह्व· सप्तैधाः सप्तवाहनः ।
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः ॥
अणुर्बृहत्कृशःस्थूलो गुणभृन्निर्गुणो महान् ।
अधृत.स्वधृत स्वास्यः प्राग्वंशो वंशवर्धनः ॥
भारभृत्कथितो योगी योगीशः सर्वकामदः ।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥
धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।
अपराजितः सर्वसहो नियन्ता नियमो यमः ॥
सत्त्ववान्सात्त्विकः सत्य सत्यधर्मपरायणः ।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत्प्रीतिवर्धनः ॥
विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ।
रविर्विरोचनः सूर्यः सविता रविलोचनः ॥
अनन्तो हुतभुग्भोक्ता सुखदो नैकदोऽग्रजः ।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥
सनात्सनातनतमः कपिलःकपिरव्ययः ।
स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः ॥
अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥
अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणा वरः ।

विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥
उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ।
वीरहा रक्षणःसन्तो जीवनः पर्यवस्थितः ॥
अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।
चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥
अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः ।
जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥
आधारनिलयो धाता पुष्पहासः प्रजागरः ।
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥
प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः ।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥
भूर्भुवः स्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञोयज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥
यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ।
यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च ॥
आत्मयोनिः स्वयंजातो वैखानः सामगायनः ॥
देवकीनन्दनःस्रष्टा क्षितीशः पापनाशनः ॥
शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ।
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥ १२० ॥

सर्वप्रहरणायुध ॐ नम इति ॥

इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् ॥
य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात्किञ्चित्सोऽमुत्रेह च मानवः ॥

वेदान्तगो ब्राह्मण· स्यात्क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ॥
धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थीचार्थमाप्नुयात् ।
कामानवाप्नुयात्कामी प्रजार्थी प्राप्नुयात्प्रजाम् ॥
भक्तिमान्य. सदोत्थाय शुचिस्तद्गतमानसः ।
सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ॥
यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च ।
अचला श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ॥
न भयं क्वचिदाप्नोति वीर्यं तेजश्च विंदति ।
भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः ॥
रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ।
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥
दुर्गाण्यतितरत्याशु पुरुष पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ॥
वासुदेवाश्रयो मर्त्यो वासुदेवपरायण· ।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥
न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥
इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः ।
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ॥
भवन्ति कृतपुण्यानां भक्ताना पुरुषोत्तमे ।
द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥

ससुरासुरगन्धर्वं सयक्षोरगराक्षसम्।
जगद्वशे वर्ततेदं कृष्णस्य सचराचरम्॥
इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः।
वसुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च॥
सर्वागमानामाचारः प्रथमं परिकल्पते।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः।
ऋषयःपितरो देवा महाभूतानि धातवः।
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम्॥
योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादि कर्म च।
वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात्॥
एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः।
त्रीन्लोकान्व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः॥१४०॥
इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम्।
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च॥
विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम्।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ॥१४२॥

———

आदित्यहृदयम्

श्रीगणेशाय नमः ॥ शतानीक उवाच ॥ कथमादित्यमुद्यंतमुपतिष्ठे-
द्द्विजोत्तम ॥ एतन्मे ब्रूहि विप्रेंद्र प्रपद्ये शरणं तव ॥१॥ सुमंतुरुवाच ॥
इदमेव पुरा पृष्टः शंखचक्रगदाधर. ॥ प्रणम्य शिरसा देवमर्जुनेन महा-
त्मना ॥२॥ कुरुक्षेत्रे महाराज प्रवृत्ते भारते रणे ॥ कृष्णानाथं समासाद्य
प्रार्थयित्वाऽब्रवीदिदम् ॥ ३ ॥ अर्जुन उवाच ॥ ज्ञानं च धर्मशास्त्राणां
गुह्याद्गुह्यतरं तथा ॥ मया कृष्ण परिज्ञातं वाङ्मयं सचराचरम् ॥ ४ ॥
सूर्यस्तुतिमयं न्यासं वक्तुमर्हसि माधव ॥ भक्त्या पृच्छामि देवेश कथयस्व
प्रसादतः ॥ ५ ॥ सूर्यभक्तिं करिष्यामि कथं सूर्यं प्रपूजयेत् ॥ तदहं
श्रोतुमिच्छामि त्वत्प्रसादेन यादव ॥ ६ ॥ श्रीभगवानुवाच ॥ रुद्रादि-
दैवतैः सर्वैः पृष्टेन कथितं मया ॥ वक्ष्येऽहं सूर्यविन्यासं शृणु पांडव
यत्नतः ॥ ७ ॥ अस्माकं यत्त्वया पृष्टमेकचित्तो भवार्जुन ॥ तदहं संप्रव-
क्ष्यामि आदिमध्यावसानकम् ॥ ८ ॥ अर्जुन उवाच ॥ नारायण सुरश्रेष्ठ
पृच्छामि त्वां महायशाः ॥ कथमादित्यमुद्यंतमुपतिष्ठेत्सनातनम् ॥९॥
श्रीभगवानुवाच ॥ साधु पार्थ महाबाहो बुद्धिमानसि पांडव ॥ यन्मां
पृच्छस्युपस्थानं तत्पवित्रं विभावसोः ॥ १० ॥ सर्वमंगलमांगल्यं सर्व-
पापप्रणाशनम् ॥ सर्वरोगप्रशमनमायुर्वर्धनमुत्तमम् ॥ ११ ॥ अमित्रदमनं
पार्थ संग्रामे जयवर्धनम् ॥ वर्धनं धनपुत्राणामादित्यहृदयं शृणु ॥ १२ ॥
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ त्रिषु लोकेषु विख्यातं
निःश्रेयसकरं परम् ॥ १३ ॥ देवदेवं नमस्कृत्य प्रातरुत्थाय चार्जुन ॥
विघ्नान्यनेकरूपाणि नश्यंति स्मरणादपि ॥ १४ ॥ तस्मात्सर्वप्रयत्नेन
सूर्यमावाहयेत्सदा ॥ आदित्यहृदयं नित्यं जाप्यं तच्छृणु पांडव ॥१५॥
यज्जपान्मुच्यते जंतुर्दारिद्र्याद्दाशु दुस्तरात् । लभते च महासिद्धिं

व्याधिविनाशनीम् ॥ १६ ॥ अस्मिन्मन्त्रे ऋषिश्छंदो देवता शक्तिरेव च ॥ सर्वमेव महाबाहो कथयामि तवाग्रतः ॥ १७ ॥ मया ते गोपितं न्यासं सर्वशास्त्रप्रबोधितम् ॥ अथ ते कथयिष्यामि उत्तमं मंत्रमेव च ॥ १८ ॥ ॐ अस्य आदित्यहृदयस्तोत्रमंत्रस्य श्रीकृष्ण ऋषिः श्रीसूर्यात्मा त्रिभुवनेश्वरो देवता ॥ अनुष्टुप्छंदः ॥ हरितहयरथं दिवाकरं घृणिरिति बीजम् ॥ ॐ नमो भगवते जितवैश्वानरजातवेदस इति शक्तिः ॥ ॐ नमो भगवते आदित्याय नमः इति कीलकम् ॥ ॐ अग्निगर्भदेवता इति मंत्रः ॥ ॐ नमो भगवते तुभ्यमादित्याय नमोनमः श्रीसूर्यनारायणप्रीत्यर्थं जपे विनियोगः ॥ अथ न्यासः ॥ ॐ ह्रां अंगुष्ठाभ्यां नमः ॥ ॐ ह्रीं तर्जनीभ्यां नमः ॥ ॐ ह्रूं मध्यमाभ्यां नमः ॥ ॐ ह्रैं अनामिकाभ्यां नमः ॥ ॐ ह्रौं कनिष्ठिकाभ्यां नमः ॥ ॐ ह्रः करतलकरपृष्ठाभ्यां नमः ॥ ॐ ह्रां हृदयाय नमः ॥ ॐ ह्रीं शिरसे स्वाहा ॥ ॐ ह्रूं शिखायै वषट् ॥ ॐ ह्रैं कवचाय हुं ॥ ॐ ह्रौं नेत्रत्रयाय वौषट् ॥ ॐ ह्रः अस्त्राय फट् ॥ ॐ ह्रांह्रींह्रूंह्रैंह्रौंह्रः इति दिग्बंधः ॥ अथ ध्यानम् ॥ भास्वद्रत्नाढ्यमौलिस्फुरदधररुचा रंजितश्चारुकेशो भास्वान्यो दिव्यतेजाः करकमलयुतः स्वर्णवर्णः प्रभाभिः ॥ विश्वाकाशावकाशग्रहपतिशिखरे भाति यश्चोदयाद्रौ सर्वानंदप्रदाता हरिहरनमितः पातु मां विश्वचक्षुः ॥ १ ॥ पूर्वमष्टदलं पद्मं प्रणवादिप्रतिष्ठितम् ॥ मायाबीजं दलाष्टाग्रे यन्त्रमुद्धारयेदिति ॥ २ ॥ आदित्यं भास्करं भानुं रविं सूर्यं दिवाकरम् ॥ मार्तंडं तपनं चेति दलेष्वष्टसु योजयेत् ॥३॥ दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला तथा ॥ अमोघा विद्युता चेति मध्ये श्रीः सर्वतोमुखी ॥ ४ ॥ सर्वज्ञः सर्वगश्चैव सर्वकारणदेवता ॥ सर्वेशं सर्वहृदयं नमामि सर्वसाक्षिणम् ॥ ५ ॥ सर्वात्मा सर्वकर्ता च सृष्टिजीवनपालकः ॥ हितः स्वर्गापवर्गश्च भास्करेश नमोऽस्तु ते ॥ ६ ॥ इति प्रार्थना ॥ नमो नमस्तेस्तु सदा विभावसो सर्वात्मने सप्तहयाय

मानवे ॥ अनंतशक्तिर्मणिभूषणेन ददस्व भुक्ति मम मुक्तिमव्ययाम् ॥७॥ अर्कं तु मूर्ध्नि विन्यस्य ललाटे तु रविं न्यसेत् ॥ विन्यसेन्नेत्रयोः सूर्यं कर्णयोश्च दिवाकरम् ॥ ८ ॥ नासिकायां न्यसेद्भानुं मुखे वै भास्करं न्यसेत् ॥ पर्जन्यमोष्ठयोश्चैव तीक्ष्णं जिह्वांतरे न्यसेत् ॥ ९ ॥ सुवर्णरेतसं कंठे स्कंधयोस्तिग्मतेजसम् ॥ बाह्वोस्तु पूषणं चैव मित्रं वै पृष्ठतो न्यसेत् ॥ १० ॥ वरुणं दक्षिणे हस्ते त्वष्टारं वामतः करे ॥ हस्तावुष्णकरः पातु हृदयं पातु भानुमान् ॥ ११ ॥ उदरे तु यमं विद्यादादित्यं नाभिमंडले ॥ कट्यां तु विन्यसेद्धंसं रुद्रमूर्वोस्तु विन्यसेत ॥ १२ ॥ जान्वोस्तु गोपतिं न्यस्य सवितारं तु जंघयोः ॥ पादयोश्च विवस्वंतं गुल्फयोश्च दिवाकरम् ॥ १३ ॥ बाह्यतस्तु तमोध्वंसं भगमभ्यंतरे न्यसेत् ॥ सर्वांगेषु सहस्रांशुं दिग्विदिक्षु भगं न्यसेत् ॥ १४ ॥ इति दिग्बंधः ॥ एष आदित्यविन्यासो देवानामपि दुर्लभः ॥ इमं भक्त्या न्यसेत्पार्थ स याति परमां गतिम् ॥ १५ ॥ कामक्रोधकृतात्पापान्मुच्यते नात्र संशयः ॥ सर्पादपि भयं नैव संग्रामेषु पथिष्वपि ॥ १६ ॥ रिपुसंकटकालेषु तथा चोरसमागमे ॥ त्रिसंध्यं जपतो न्यासं महापातकनाशनम् ॥ १७ ॥ विस्फोटकसमुत्पन्नं तीव्रज्वरसमुद्भवम् ॥ शिरोरोगं नेत्ररोगं सर्वव्याधिविनाशनम् ॥१८॥ कुष्ठव्याधिस्तथा दद्रुरोगाश्च विविधाश्च ये ॥ जपमानस्य नश्यंति शृणु भक्त्या तदर्जुन ॥ १९ ॥ आदित्यो मंत्रसंयुक्त आदित्यो भुवनेश्वरः ॥ आदित्यान्नापरो देवो ह्यादित्यः परमेश्वरः ॥२०॥ आदित्यमर्चयेद्ब्रह्मा शिव आदित्यमर्चयेत् ॥ यदादित्यमयं तेजो मम तेजस्तदर्जुन ॥ २१ ॥ आदित्यं ये प्रपश्यन्ति मां पश्यन्ति न संशयः ॥ २२ ॥ त्रिसंध्यमर्चयेत्सूर्यं स्मरेद्भक्त्या तु यो नरः ॥ न स पश्यति दारिद्र्यं जन्मजन्मनि चार्जुन ॥ २३ ॥ एतत्ते कथितं पार्थ ह्यादित्यहृदयं मया शृण्वन्मुक्तश्च पापेभ्यः सूर्यलोके महीयते ॥ २४ ॥ नमो भगवते तुभ्यमादित्याय नमोनमः ॥

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ॥ २५ ॥ सुवर्णः स्फटिको भानुः स्फुरितो विश्वतापनः ॥ रविर्विश्वो महातेजाः सुवर्णः सुप्रबोधकः ॥ २६ ॥ हिरण्यगर्भस्त्रिशिरास्तपनो भास्करो रविः ॥ मार्तंडो गोपतिः श्रीमान् कृतज्ञश्च प्रतापवान् ॥ २७ ॥ तमिस्रहा भगो हंसो नासत्यश्च तमोनुदः ॥ शुद्धो विरोचनः केशी सहस्रांशुर्महाप्रभुः ॥ २८ ॥ विवस्वान्पूषणो मृत्युर्मिहिरो जामदग्न्यजित् ॥ धर्मरश्मिः पतंगश्च शरण्यो मित्रहा तपः ॥ २९ ॥ दुर्विज्ञेयगतिः शूररतेजोराशिर्महायशाः ॥ शंभुश्चित्रांगदः सौम्यो हव्यकव्यप्रदायकः ॥ ३० ॥ अंशुमानुत्तमो देव ऋग्यजुः साम एव च ॥ हरिदश्वस्तमोदारः सप्तसप्तिर्मरीचिमान् ॥ ३१ ॥ अग्निगर्भोऽदितेः पुत्रः शंभुस्तिमिरनाशनः ॥ पूषा विश्वम्रो मित्रः सुवर्णः सुप्रतापवान् ॥ ३२ ॥ आतपी मंडली भास्वांस्तपनः सर्वतापनः ॥ कृतविश्वो महातेजाः सर्वरत्नमयोद्भवः ॥३३॥ अक्षरश्च क्षरश्चैव प्रभाकरविभाकरौ ॥ चंद्रश्चन्द्रांगदः सौम्यो हव्यकव्यप्रदायकः ॥३४॥ अंगारको गदोऽगस्ती रक्तांगश्चांगवर्धनः ॥ बुधो बुद्धासनो बुद्धिर्बुद्धात्मा बुद्धिवर्धनः ॥३५॥ बृहद्भानुर्बृहद्भासो बृहद्धामा बृहस्पतिः ॥ शुक्रस्त्वं शुक्ररेताःस्त्वं शुक्लांगः शुक्लभूषणः ॥ ३६ ॥ शनिमान् शनिरूपस्त्वं शनैर्गच्छसि सर्वदा ॥ अनादिरादिरादित्यस्तेजोराशिमहातपाः ॥३७॥ अनादिरादिरूपस्त्वमादित्यो दिक्पतिर्यमः ॥ भानुमान् भानुरूपस्त्वं स्वर्भानुर्भानुदीप्तिमान् ॥ ३८ ॥ धूमकेतुर्महाकेतुः सर्वकेतुरनुत्तमः ॥ तिमिरावरणः शंभुः स्रष्टाः मार्तण्ड एव च ॥ ३९ ॥ नमः पूर्वाय गिरये पश्चिमाय नमो नमः ॥ नमोत्तराय गिरये दक्षिणाय नमो नमः ॥ ४० ॥ नमो नमः सहस्रांशो ह्यादित्याय नमो नमः ॥ नमः पद्मप्रबोधाय नमस्ते, द्वादशात्मने ॥४१॥ नमो विश्वप्रबोधाय नमो भ्राजिष्णुजिष्णवे ॥ ज्योतिषे च नमस्तुभ्यं ज्ञानार्काय नमो नमः ॥४२॥ प्रदीप्ताय प्रगल्भाय युगान्ताय नमो

नमः ॥ नमस्ते होतृपतये पृथिवीपतये नमः ॥ ४३ ॥ नमोंकार वषट्कार सर्वयज्ञ नमोऽस्तु ते ॥ ऋग्वेदाथ यजुर्वेद सामवेद नमोऽस्तुते ॥ ४४ ॥ नमो हाटकवर्णाय भास्कराय नमोनमः जयाय जयभद्राय हरिदश्वाय ते नमः ॥ ४५ ॥ दिव्याय दिव्यरूपाय ग्रहाणा पतये नमः ॥ नमस्ते शुचये नित्यं नमः कुरुकुलात्मने ॥ ४६ ॥ नमस्त्रैलोक्यनाथाय भूताना पतये नमः ॥ नम. कैवल्यनाथाय नमस्ते दिव्यचक्षुषे ॥ ४७ ॥ त्वं ज्योतिस्त्वं द्युतिर्ब्रह्मा त्वं विष्णुस्त्वं प्रजापतिः ॥ त्वमेव रुद्रो रुद्रात्मा वायुरग्निस्त्वमेव च ॥४८॥ योजनाना सहस्रे द्वे द्वे शते द्वे च योजने ॥ एकेन निमिषार्धेन क्रममाण नमोऽस्तुते ॥ ४६ ॥ नवयोजनलक्षाणि सहस्रद्विशतानि च ॥ यावद्घटीप्रमाणेन क्रममाण नमोऽस्तु ते ॥ ५० ॥ अग्रतश्च नमस्तुभ्यं पृष्ठतश्च सदा नमः ॥ पार्श्वतश्च नमस्तुभ्यं नमस्ते चास्तु सर्वदा ॥५१॥ नमः सुरारिहंत्रे च सोमसूर्याग्निचक्षुषे ॥ नमो दिव्याय व्योमायसर्वतंत्रमयाय च ॥ ५२ ॥ नमो वेदांतवेद्याय सर्वकर्मादिसाक्षिणे ॥ नमो हरितवर्णाय सुवर्णाय नमो नमः ॥ ५३ ॥ अरुणो माघमासे तु सूर्यो वै फाल्गुने तथा ॥ चैत्रमासे तु वेदांगो भानुर्वैशाखतापन. ॥ ५४ ॥ ज्येष्ठमासे तपेदिंद्र आषाढे तपते रविः ॥ गभस्तिः श्रावणे मासि यमो भाद्रपदे तथा ॥ ५५ ॥ इषे सुवर्णरेताश्च कार्तिके च दिवाकरः ॥ मार्गशीर्षे तपेन्मित्र. पौषे विष्णुः सनातनः ॥ ५६ ॥ पुरुषस्त्वधिके मासे मासाधिक्ये तु कल्पयेत् ॥ इत्येते द्वादशादित्याः काश्यपेयाः प्रकीर्तिताः ॥५७॥ उग्ररूपा महात्मानस्तपंते विश्वरूपिणः ॥ धर्मार्थकाममोक्षाणां प्रस्फुटा हेतवो नृप ॥ ५८ ॥ सर्वपापहरं चैवमादित्यं संप्रपूजयेत् ॥ एकधा दशधा चैव शतधा च सहस्रधा ॥ ५६ ॥ तपंते विश्वरूपेण सृजंति संहरंति च ॥ एष विष्णुः शिवश्चैव ब्रह्मा चैव प्रजापतिः ॥ ६० ॥ महेंद्रश्चैव कालश्च यमो वरुण एव च ॥ नक्षत्रग्रहताराणामधिपो विश्वतापनः ॥ ६१ ॥

-मायुरमिर्धनाध्यक्षो भूतकर्ता स्वयंप्रभुः ॥ एष देवो हि देवानां सर्वमा-प्यायते जगत् ॥ ६२ ॥ एष कर्ता हि भूतानां संहर्ता रक्षकस्तथा ॥ एष लोकानुलोकाश्च सप्तद्वीपाश्च सागराः ॥६३॥ एष पातालसप्तस्था दैत्यदानवराक्षसाः ॥ एष धाता विधाता च बीजं क्षेत्रं प्रजापतिः ॥ ६४ ॥ एक एव प्रजा नित्यं संवर्धयति रश्मिभिः ॥ एष यज्ञः स्वधा स्वाहा ह्रीः श्रीश्च पुरुषोत्तमः ॥ ६५ ॥ एष भूतात्मको देवः सूक्ष्मोऽव्यक्तः सनातनः ॥ ईश्वरः सर्वभूतानां परमेष्ठी प्रजापतिः ॥ ६६ ॥ कालात्मा सर्वभूतात्मा वेदात्मा विश्वतोमुखः ॥ जन्ममृत्युजराव्याधिसंसारभयनाशनः ॥ ६७ ॥ दारिद्र्यव्यसनध्वंसी श्रीमान्देवो दिवाकरः ॥ विकर्तनो विवस्वांश्च मार्तण्डो भास्करो रविः ॥६८॥ लोकप्रकाशकः श्रीमांल्लोकचक्षुर्महेश्वरः ॥ लोकसाक्षी त्रिलोकेशः कर्ता हर्ता तमिस्रहा ॥ ६६ ॥ तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥ गभस्तिहस्तो ब्रह्मण्यः सर्वदेवनमस्कृतः ॥ ७० ॥ आयुरारोग्यमैश्वर्यं नरा नार्यश्च मंदिरे ॥ यस्य प्रसादात्सन्तुष्टिरादित्य-हृदयं जपेत् ॥७१॥ इत्येतैर्नामभिः पार्थ आदित्यं स्तौति नित्यशः॥ प्रात-रुत्थाय कौंतेय तस्य रोगभयं न हि ॥७२॥ पातकान्मुच्यते पार्थ व्याधि-भ्यश्च न संशयः ॥ एकसन्ध्यं द्विसन्ध्यं वा सर्वपापैः प्रमुच्यते ॥७३॥ त्रिसन्ध्यं जपमानस्तु पश्येच परमं पदम् ॥ यदह्ना कुरुते पापं तदह्ना प्रति-मुच्यते ॥७४॥ यद्रात्र्या कुरुते पापं तद्रात्र्या प्रतिमुच्यते ॥ दद्रुस्फोटक-कुष्ठानि मण्डलानि विषूचिका ॥७५॥ सर्वव्याधिमहारोगभूतबाधास्तथैव च ॥ डाकिनी शाकिनी चैव महारोगभयं कुतः ॥ ७६ ॥ ये चान्ये दुष्ट-रोगाश्च ज्वरातीसारकादयः ॥ जपमानस्य नश्यन्ति जीवेच्च शरदां शतम् ॥ ७७ ॥ संवत्सरेण मरणं यदा तस्य ध्रुवं भवेत् । अशीर्षां पश्यति च्छायामहोरात्रं धनञ्जय ॥ ७८ ॥ यस्त्विदं पठते भक्त्या भानोर्वारे महात्मनः ॥ प्रातःस्नाने कृते पार्थ एकाग्रकृतमानसः ॥ ७९ ॥ सुवर्णचक्षु-

भवति न चान्धस्तु प्रजायते ॥ पुत्रवान्धवसम्पन्नो जायते चारुजः सुखी ॥ ८० ॥ सर्वसिद्धिमवाप्नोति सर्वत्र विजयी भवेत् ॥ आदित्यहृदयं पुण्यं सूर्यनामविभूषितम् ॥ ८१ ॥ श्रुत्वा च निखिलं पार्थ सर्वपापैः प्रमुच्यते ॥ अतः परतरं नास्ति सिद्धिकामस्य पांडव ॥ ८२ ॥ एतज्जपस्व कौंतेय येन श्रेयो ह्यवाप्स्यसि ॥ आदित्यहृदयं नित्यं यः पठेत्सुसमाहितः ॥ ८३ ॥ भ्रूणहा मुच्यते पापात्कृतघ्नो ब्रह्मघातकः ॥ गोघ्नः सुरापी दुर्भोजी दुष्प्रतिग्रहकारकः ॥ ८४ ॥ पातकानि च सर्वाणि दहत्येव न संशयः ॥ य इदं शृणुयान्नित्यं जपेद्वापि समाहितः ॥ ८५ ॥ सर्वपापविशुद्धात्मा सूर्यलोके महीयते ॥ अपुत्रो लभते पुत्रान्निर्धनो धनमाप्नुयात् ॥८६॥ कुरोगी मुच्यते रोगाद्भक्त्या यः पठते सदा ॥ यस्त्वादित्यदिने पार्थ नाभिमात्रजले स्थितः ॥ ८७ ॥ उदयाचलमारूढं भास्करं प्रणतः स्थितः ॥ जपते मानवो भक्त्या शृणुयाद्वापि भक्तितः ॥ ८८ ॥ स याति परमं स्थानं यत्र देवो दिवाकरः ॥ अमित्रदमनं पार्थ यदा कर्तुं समारभेत् ॥ ८९ ॥ तदा प्रतिकृतिं कृत्वा शत्रोश्चरणपांसुभिः ॥ आक्रम्य वामपादेन ह्यादित्यहृदयं जपेत् ॥ ९० ॥ एतन्मंत्रं समाहूय सर्वसिद्धिकरं परम् ॥ ॐ ह्रीं हिमालीढं स्वाहा ॥ ओं ह्रीं मालीढं स्वाहा ओं ह्रीं निलीढं स्वाहा ॥ इति मन्त्रः ॥ त्रिभिश्च रोगी भवति ज्वरी भवति पञ्चभिः ॥ जपैस्तु सप्तभिः पार्थ राक्षसी तनुमाविशेत् ॥ ९१ ॥ राक्षसेनाभिभूतस्य विकारान् शृणु पांडव ॥ गीयते नृत्यते नग्न

जयाय जयभद्राय हरिदश्वाय ते नमः ॥ ९६ ॥ स्नापयेत्तं न मन्त्रेण शुभं भवति नान्यथा ॥ अन्यथा च भवेद्दोषो नश्यते नात्र संशयः ॥ ९७ ॥ अतस्ते निखिलः प्रोक्तः पूजां चैव निबोध मे ॥ उपलिप्ते शुचौ देशे नियतो वाग्यतः शुचिः ॥ ९८ ॥ वृत्तं वा चतुरस्रं वा लिप्तभूमौ लिखेच्छुचिः ॥ त्रिधा तत्र लिखेत्पद्ममष्टपत्रं सकर्णिकम् ॥९९॥ अष्टपत्रं लिखेत्पद्मं लिप्तगोमयमण्डले ॥ पूर्वपत्रे लिखेत् सूर्यमाग्नेय्यां तु रविं न्यसेत् ॥ १०० ॥ याम्ययां च विवस्वन्तं नैरृत्यां तु भगं न्यसेत् ॥ प्रतीच्यां वरुणं विद्याद्वायव्यां मित्रमेव च ॥ १०१ ॥ आदित्यमुत्तरे पत्रे ईशान्यां मित्रमेव च ॥ मध्ये तु भास्करं विद्यात्क्रमेणैव समर्चयेत् ॥ १०२ ॥ अतः परतरं नास्ति सिद्धिकामस्य पाण्डव ॥ महातेजः समुद्यन्तं प्रणमेत्स कृतांजलिः ॥ १०३ ॥ सकेसराणि पद्मानि करवीराणि चार्जुन ॥ तिलतण्डुलयुक्तानि कुशगन्धोदकानि च ॥१०४॥ रक्तचन्दनमिश्राणि कृत्वा वै ताम्रभाजने ॥ धृत्वा शिरसि तत् पात्रं जानुभ्यां धरणीं स्पृशेत् ॥ १०५ ॥ मन्त्रपूतं गुडाकेश चार्घ्यं दद्याद्गभस्तये ॥ सायुधं सरथं चैव सूर्यमावाहयाम्यहम् ॥ १०६ ॥ स्वागतो भव ॥ सुप्रतिष्ठितो भव ॥ सन्निधौ भव सन्निहितो भव ॥ सम्मुखो भव ॥ इति पञ्च मुद्राः ॥ स्फुटयित्वाऽर्घ्येत्सूर्यं भुक्ति मुक्ति लभेन्नरः ॥१०७॥ ॐ श्रीं विद्याकिलिकिलिकटकेटसर्वार्थसाधनाय स्वाहा ॥ ॐ श्रीं ह्रीं ह्रूं हं सः सूर्याय नमः स्वाहा ॥ ॐ श्रीं ह्रां ह्रीं ह्रूं ह्रः सूर्यमूर्तये स्वाहा ॥ ॐ श्रीं ह्रीं खं खः लोकाय सर्वमूर्तये स्वाहा ॥ ॐ ह्रूं मार्तण्डाय स्वाहा ॥ नमोऽस्तु सूर्याय सहस्रभानवे नमोस्तु वैश्वानरजातवेदसे ॥ त्वमेव चार्घ्यं प्रतिगृह्य देव देवाधिदेवाय नमो नमस्ते ॥१०८॥ नमो भगवते तुभ्यं नमस्ते जातवेदसे ॥ दत्तमर्घ्यं मया भानो त्वं गृहाण नमोऽस्तु ते ॥१०९॥ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते । अनुकम्पय मां देव गृहाणार्घ्यं नमोऽस्तु ते ॥११०॥ नमो भगवते तुभ्यं नमस्ते

जातवेदसे ॥ ममेदमर्घ्यं गृह्ण त्वं देवदेव नमोऽस्तु ते ॥ १११ ॥ सर्वदेवाधिदेवाय आधिव्याधि विनाशिने ॥ इदं गृहाण मे देव सर्वव्याधिर्विनश्यतु ॥११२॥ नमः सूर्याय शान्ताय सर्वरोगविनाशिने ॥ ममेप्सितं फलं दत्त्वा प्रसीद परमेश्वर ॥११३॥ ॐ नमो भगवते सूर्याय स्वाहा ॥ ॐ शिवाय स्वाहा ॥ ॐ सर्वात्मने सूर्याय नमः स्वाहा ॥ ॐ अक्षय्यतेजसे नमः स्वाहा ॥ सर्वसंकष्टदारिद्र्यं शत्रुं नाशय नाशय ॥ सर्वलोकेषु विश्वात्मन्सर्वात्मन्सर्वदर्शक ॥ ११४ ॥ नमो भगवते सूर्य कुष्ठरोगान्विखण्डय ॥ आयुरारोग्यमैश्वर्यं देहि देव नमोऽस्तु ते ॥ ११५ ॥ नमो भगवते तुभ्यमादित्याय नमोनमः ॥ ॐ अक्षय्यतेजसे नमः ॥ ॐ सूर्याय नमः ॥ आदित्यं च शिवं विद्याच्छिवमादित्यरूपिणम् ॥ उभयोरन्तरं नास्ति आदित्यस्य शिवस्य च ॥११६॥ एतदिच्छाम्यहं श्रोतुं पुरुषो वै दिवाकरः॥ उदये ब्रह्मणो रूपं मध्याह्ने तु महेश्वरः ॥११७॥ अस्तमाने स्वयं विष्णुस्त्रिमूर्तिश्च दिवाकरः ॥ नमो भगवते तुभ्यं विष्णवे प्रभविष्णवे ॥११८॥ ममेदमर्घ्यं प्रतिगृह्ण देव देवाधिदेवाय नमो नमस्ते ॥ श्रीसूर्यनारायणाय सांगाय सपरिवाराय इदमर्घ्यं समर्पयामि ॥११६॥ हिमघ्नाय तमोघ्नाय रक्षोघ्नाय च ते नमः ॥ कृतघ्नघ्नाय सत्याय तस्मै सूर्यात्मने नमः ॥ १२० ॥ जयो जयश्च विजयो जितप्राणो जितश्रमः ॥ मनोजयो जितक्रोधो वाजिनः सप्त कीर्तिताः ॥१२१॥ हरितहयरथं दिवाकरं कनकमयाम्बुजरेणुपिंजरम् ॥ प्रतिदिनमुदये नवं नवं शरणमुपैमि हिरण्यरेतसम् ॥१२२॥ न तं व्यालाः प्रबाधन्ते न व्याधिभ्यो भयं भवेत् ॥ न नागेभ्यो भयं चैव न च भूतभयं क्वचित् ॥१२३॥ अग्निशत्रुभयं नास्ति पार्थिवेभ्यस्तथैव च ॥ दुर्गतिं तरते घोरां प्रजां च लभते पशून् ॥१२४॥ सिद्धिकामो लभेत्सिद्धिं कन्याकामस्तु कन्यकाम् ॥ एतत्पठेत्स कौन्तेय भक्तियुक्तेन चेतसा ॥१२५॥ अश्वमेधसहस्रस्य वाजपेयशतस्य च ॥ कन्या

कोटिसहस्रस्य दत्तस्य फलमाप्नुयात् ॥१२६॥ इदमादित्यहृदयं योऽधीते सततं नरः ॥ सर्वपापविशुद्धात्मा सूर्यलोके महीयते ॥१२७॥ नास्त्यादित्यसमो देवो नास्त्यादित्यसमा गतिः ॥ प्रत्यक्षो भगवान्विष्णुर्येन विश्वं प्रतिष्ठितम् ॥१२८॥ नवतिर्योजनं लक्षं सहस्राणि शतानि च याव-द्घटीप्रमाणेन तावच्चरति भास्करः ॥१२९॥ गवां शतसहस्रस्य सम्यग्दत्तस्य यत्फलम् ॥ तत्फलं लभते विद्वान् शान्तात्मा स्तौति यो रविम् ॥ १३० ॥ योऽधीते सूर्यहृदयं सकलं सफलं भवेत् ॥ अष्टानां ब्राह्मणानां च लेख-यित्वा समर्पयेत् ॥१३१॥ ब्रह्मलोके ऋषीणां च जायते मानुषोऽपि वा ॥ जातिस्मरत्वमाप्नोति शुद्धात्मा नात्र संशयः ॥१३२॥ अजाय लोकत्रयपावनाय भूतात्मने गोपतये वृषाय ॥ सूर्याय सर्वप्रलयान्तकाय नमो महाकारुणिकोत्तमाय ॥ १३३॥ विवस्वते ज्ञानभृदन्तरात्मने जगत्प्रदीपाय जगद्धितैषिणे ॥ स्वयम्भुवे दीप्तसहस्रचक्षुषे सुरोत्तमायामिततेजसे नमः ॥ १३४ ॥ सुरैरनेकैः परिसेविताय हिरण्यगर्भाय हिरण्मयाय ॥ महात्मने मोक्षपदाय नित्यं नमोऽस्तु ते वासरकारणाय ॥१३५॥ आदित्यश्चार्चितो देव आदित्यः परमं पदम् ॥ आदित्यो मातृको भूत्वा आदित्यो वाङ्मयं जगत् ॥१३६॥ आदित्यं पश्यते भक्त्या मां पश्यति ध्रुवं नरः ॥ नादित्यं पश्यते भक्त्या न स पश्यति मां नरः ॥ १३७ ॥ त्रिगुणं च त्रितत्त्वं च त्रयो देवास्त्रयोऽग्नयः ॥ त्रयाणां च त्रिमूर्तिस्त्वं तुरीयस्त्वं नमोऽस्तु ते ॥१३८॥ नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ॥ त्रयीमयाय त्रिगुणात्मधारिणे विरञ्चिनारायणशङ्करात्मने ॥ १३९ ॥ यस्योदयेनेह जगत्प्रबुद्ध्यते प्रवर्तते चाखिलकर्मसिद्धये ॥ ब्रह्मेन्द्रनारायणरुद्रवन्दितः स नः सदा यच्छतु मङ्गलं रविः ॥ १४० ॥ नमोऽस्तु सूर्याय सहस्ररश्मये सहस्रशाखान्वितसम्भवात्मने ॥ सहस्रयोगोद्भवभावभागिने सहस्रसंख्यायुगधारिणे नमः ॥१४१॥ यन्मण्डलं दीप्तिकरं विशालं रत्न-

प्रभं तीव्रमनादिरूपम् ।। दारिद्र्यदुःखक्षयकारणं च पुनातु मा तत्सवितु-र्वरेण्यम् ।।१४२।। यन्मण्डलं देवगणैः सुपूजितं विप्रैः स्तुतं भावनमुक्तिकोविदम् ।। तं देवदेवं प्रणमामि सूर्यं पुनातु मा तत्सवितुर्वरेण्यम् ।।१४३।। यन्मण्डलं ज्ञानघनं त्वगम्यं त्रैलोक्यपूज्यं त्रिगुणात्मरूपम् ।। समस्त-तेजोमयदिव्यरूपं पुनातु मा तत्सवि० ।। १४४ ।। यन्मण्डलं मूढमतिप्रबोधं धर्मस्य वृद्धिं कुरुते जनानाम् ।। यत्सर्वपापक्षयकारणं च पुनातु मां त० ।।१४५ ।। यन्मण्डलं व्याधिविनाशदक्षं यदृग्यजुः सामसु संप्रगीतम् ।। प्रकाशितं येन च भूर्भुवः स्वः पुनातु मा त० ।।१४६।। यन्मंडलं वेदविदो वदंति गायंति यच्चारणसिद्धसंघा. ।। यद्योगिनो योगजुषा च संघाः पुनातु मा त० ।। १४७ ।। यन्मंडलं सर्वजनेषु पूजितं ज्योतिश्च कुर्यादिह मर्त्यलोके ।। यत्कालकालादिमनादिरूपं पुनातु मां त० ।। १४८ ।। यन्मंडलं विष्णुचतुर्मुखाख्यं यदक्षरं पापहरं जनानाम् ।। यत्कालकल्पक्षयकारणं च पुनातु मां त० ।।१४९।। यन्मंडलं विश्वसृजा प्रसिद्धमुत्पत्तिरक्षाप्रलयप्रगल्भम् ।। यस्मिञ्जगत्संहरतेऽखिलं च पुनातु मा त० ।। १५० ।। यन्मण्डलं सर्वगतस्य विष्णोरात्मा परं धाम विशुद्धतत्त्वम् ।। सूक्ष्मांतरैर्योगपथानुगम्यं पुनातु मा तत्स० ।।१५१।। यन्मंडलं ब्रह्मविदो वदंति गायन्ति यच्चारणसिद्धसंघा. ।। यन्मण्डलं वेदविदः स्मरंति पुनातु मा तत्स० ।।१५२।। यन्मण्डलं वेदविदोपगीतं यद्योगिना योगपथानुगम्यम् ।। तत्सर्ववेदं प्रणमामि सूर्यं पुनातु मां त० ।। १५३ ।। मण्डलाष्टमिदं पुण्यं यः पठेत्सततं नरः ।। सर्वपापविशुद्धात्मा सूर्यलोके महीयते ।। १५४ ।। ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः ।। केयूरवान्मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशंखचक्र ।। १५५ ।। सशंखचक्रं रविमंडले स्थितं कुशेशयाक्रांतमनंतमच्युतम् ।। भजामि बुद्ध्या तपनीयमूर्तिं सुरोत्तमं चित्रविभूषणोज्ज्वलम् ।। १५६ ।। एवं ब्रह्मादयो देवा

ऋषयश्च तपोधनाः ॥ कीर्तयंति सुरश्रेष्ठं देवं नारायणं विभुम् ॥ १५७ ॥ वेदवेदांगशारीरं दिव्यदीप्तिकरं परम् ॥ रक्षोघ्नं रक्तवर्णं च सृष्टिसंहारकारकम् ॥ १५८ ॥ एकचक्रो रथो यस्य दिव्यः कनकभूषितः ॥ स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः ॥१५९॥ आदित्यः प्रथमं नाम द्वितीयं तु दिवाकरः ॥ तृतीयं भास्करः प्रोक्तं चतुर्थं तु प्रभाकरः ॥१६०॥ पंचमं तु सहस्रांशुः षष्ठं चैव त्रिलोचनः ॥ सप्तमं हरिदश्वश्च ह्यष्टमं तु विभावसुः ॥१६१॥ नवमं दिनकृत्प्रोक्तं दशमं द्वादशात्मकम् ॥ एकादशं त्रयीमूर्तिर्द्वादशं सूर्य एव ॥ १६२ ॥ द्वादशादित्यनामानि प्रातःकाले पठेन्नरः ॥ दुःस्वप्ननाशनं चैव सर्वदुःखं च नश्यति ॥ १६३ ॥ दद्रुकुष्ठहरं चैव दारिद्र्यं हरते ध्रुवम् ॥ सर्वतीर्थप्रदं चैव सर्वकामप्रवर्धनम् ॥ १६४ ॥ यः पठेत्प्रातरुत्थाय भक्त्या नित्यमिदं नरः ॥ सौख्यमायुस्तथाऽरोग्यं लभते मोक्षमेव च ॥ १६५ ॥ अग्निमीले नमस्तुभ्यमिषेत्वोर्जस्वरूपिणे ॥ अग्नआयाहिवीतस्त्वं नमस्ते ज्योतिषाम्पते ॥१६६॥ शन्नोदेवि नमस्तुभ्यं जगच्चक्षुर्नमोऽस्तु ते ॥ पञ्चमायोपवेदाय नमस्तुभ्यं नमो नमः ॥ १६७ ॥ पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ॥ सप्ताश्वरथसंयुक्तो द्विभुजः स्यात्सदा रविः ॥१६८॥ आदित्यस्य नमस्कारं ये कुर्वंति दिने दिने ॥ जन्मांतरसहस्रेषु दारिद्र्यं नोपजायते ॥१६९॥ उदयगिरिमुपेतं भास्करं पद्महस्तं निखिलभुवननेत्रं रत्नरत्नोपमेयम् ॥ तिमिरकरिमृगेन्द्रं बोधकं पद्मिनीनां सुरवरमभिवंदे सुन्दरं विश्ववंद्यम् ॥ १७० ॥

इति श्रीभविष्यपु० श्रीकृष्णार्जुनसं० आदित्यहृदयस्तोत्रं संपूर्णम् ।

शीतलाष्टकम्

श्रीगणेशाय नम ॥ अस्य श्रीशीतलास्तोत्रस्य महादेव ऋषि ॥ अनुष्टुप् छंद ॥ शीतला देवता ॥ लक्ष्मी बीजम् ॥ भवानी शक्ति ॥ सर्वविस्फोटकनिवृत्तये जपे विनियोग ॥ ईश्वर उवाच ॥ वदेऽहं शीतला देवीं रासभस्था दिगम्बराम् ॥ मार्जनीकलशोपेता शूर्पालंकृतमस्तकाम् ॥ १ ॥ वदेऽहं शीतला देवीं सर्वरोगभयापहाम् ॥ यामासाद्य निवर्तेत विस्फोटकभयं महत् ॥ २ ॥ शीतले शीतले चेति यो ब्रूयाद्दाहपीडित ॥ विस्फोटकभय घोर क्षिप्र तस्य प्रणश्यति ॥ ३ ॥ यस्त्वामुदकमध्ये तु धृत्वा पूजयते नर ॥ विस्फोटकभयं घोरं गृहे तस्य न जायते ॥ ४ ॥ शीतले ज्वरदग्धस्य पूतिगंधयुतस्य च ॥ प्रनष्टचक्षुप पुंसस्त्वामाहुर्जीवनौषधम् ॥ ५ ॥ शीतले तनुजान्रोगान्नृणा हरसि दुस्त्यजान् ॥ विस्फोटकविदीर्णाना त्वमेकाऽमृतवर्षिणी ॥ ६ ॥ गलगडग्रहा रोगा ये चान्ये दारुणा नृणाम् ॥ त्वदनुध्यानमात्रेण शीतले याति सक्षयम् ॥ ७ ॥ न मन्त्रो नौषध तस्य पापरोगस्य विद्यते । त्वामेका शीतले धात्री नान्या पश्यामि देवताम् ॥ ८ ॥ मृणालतंतुसदृशीं नाभिहृन्मध्यसंस्थिताम् ॥ यस्त्वा सचिंतयेद्देवि तस्य मृत्युर्न जायते ॥ ९ ॥ अष्टक शीतलादेव्या यो नर सपठेत्सदा ॥ विस्फोटकभयं घोरं गृहे तस्य न जायते ॥१०॥ श्रोतव्यं पठितव्य च श्रद्धाभक्तिसमन्वितै ॥ उपसर्गविनाशाय परं स्वस्त्ययनं महत् ॥ ११ ॥ शीतले त्व जगन्माता शीतले त्व जगत्पिता ॥ शीतले त्व जगद्धात्री शीतलायै नमो नम ॥ १२ ॥ रासभो गर्दभश्चैव खरो वैशाखनदन ॥ शीतलावाहनश्चैव दूर्वाकदनिकृंतन ॥ १३ ॥ एतानि खरनामानि शीतलाग्रे तु य पठेत् ॥ तस्य गेहे शिशूनां च शीतलारुड् न जायते ॥ १४ ॥ शीतलाष्टकमेवेद न देय यस्य कस्यचित् ॥ दातव्यं च सदा तस्मै श्रद्धाभक्तियुताय वै ॥ १५ ॥

इति श्रीस्कन्दपुराणे शीतलाष्टकस्तोत्रं संपूर्णम् १४ ।

अन्नपूर्णास्तोत्रम्

श्रीगणेशाय नमः॥ नित्यानंदकरी वराभयकरी सौंदर्यरत्नाकरी निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी ॥ प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ १ ॥ नानारत्नविचित्रभूषणकरी हेमांबराडंबरी मुक्ताहारविलंबमानविलसद्वक्षोजकुम्भान्तरी ॥ काश्मीरागुरुवासिता रुचिकरी काशीपुराधीश्वरी भिक्षां देहि कृपा० ॥ २ ॥ योगानन्दकरी रिपुक्षयकरी धर्मार्थनिष्ठाकरी चन्द्रार्कानलभासमानलहरी त्रैलोक्यरक्षाकरी ॥ सर्वैश्वर्यसमस्तवाञ्छितकरी काशीपुराधीश्वरी भिक्षां देहि कृपा० ॥ ३ ॥ कैलासाचलकन्दरालयकरी गौरी उमा शंकरी कौमारी निगमार्थगोचरकरी ओंकारबीजाक्षरी ॥ मोक्षद्वारकपाटपाटनकरी काशीपुराधीश्वरी भिक्षां देहि कृपा० ॥ ४ ॥ दृश्यादृश्यप्रभूतवाहनकरी ब्रह्माण्डभाण्डोदरी लीलानाटकसूत्रभेदनकरी विज्ञानदीपांकुरी ॥ श्रीविश्वेशमनःप्रसादनकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ५ ॥ उर्वी सर्वजनेश्वरी भगवती मातान्नपूर्णेश्वरी वेणीनीलसमानकुन्तलहरी नित्यान्नदानेश्वरी ॥ सर्वानन्दकरी दशां शुभकरी काशीपुराधीश्वरी भिक्षां देहि कृपा० ॥ ६ ॥ आदिक्षान्तिसमस्तवर्णनकरी शम्भोस्त्रिभावाकरी काश्मीरा त्रिजलेश्वरी त्रिलहरी नित्यांकुरा शर्वरी ॥ कामाकाङ्क्षकरी जनोदयकरी काशीपुराधीश्वरी भिक्षां देहि कृपा० ॥७॥ देवी सर्वविचित्ररत्नरचिता दाक्षायणी सुन्दरी वामं स्वादुपयोधरप्रियकरी सौभाग्यमाहेश्वरी ॥ भक्ताभीष्टकरी दशाशुभकरी काशीपुराधीश्वरी भिक्षां देहि कृपा० ॥ ८ ॥ चन्द्रार्कानलकोटिकोटिसदृशा चन्द्रांशुबिम्बाधरी चन्द्रार्काग्निसमानकुन्तलधरी चन्द्रार्कवर्णेश्वरी ॥ मालापुस्तकपाशसांकुशधरी काशीपुराधीश्वरी भिक्षां देहि

कृपा० ॥ ६ ॥ क्षत्रत्राणकरी महाऽभयकरी माता कृपासागरी साक्षान्मोक्षकरी सदाशिवकरी विश्वेश्वरी श्रीधरी ॥ दक्षाक्रन्दकरी निरामयकरी काशीपुराधीश्वरी भिक्षां देहि कृपा० ॥ १० ॥ अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे ॥ ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वति ॥ ११ ॥ माता च पार्वती देवी पिता देवो महेश्वरः ॥ बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम् ॥ १२ ॥

इतिश्रीमच्छंकराचार्यविरचितमन्नपूर्णाष्टकस्तोत्रं सम्पूर्णम् १५ ।

गङ्गाष्टकम्

श्रीगणेशाय नमः ॥ मातः शैलसुतासपत्नि वसुधाशृङ्गारहारावलि स्वर्गारोहणवैजयन्ति भवतीं भागीरथीं प्रार्थये ॥ त्वत्तीरे वसतस्त्वदम्बु पिबतस्त्वद्वीचिषु प्रेंखतस्त्वन्नाम स्मरतस्त्वदर्पितदृशः स्यान्मे शरीरव्ययः ॥ १ ॥ त्वत्तीरे तरुकोटरान्तरगतो गङ्गे विहंगो वरं त्वन्नीरे नरकान्तकारिणि वरं मत्स्योऽथवा कच्छपः ॥ नैवान्यत्र मदांधसिन्धुरघटासंघट्टघण्टारणत्कारत्रस्तसमस्तवैरिवनितालब्धस्तुतिर्भूपतिः ॥ २ ॥ उक्षा पक्षी तुरग उरगः कोऽपि वा वारणो वा वाराणस्यां जननमरणक्लेशदुःखासहिष्णुः ॥ न त्वन्यत्र प्रविरलरणत्कंकणक्वाणमिश्रं वारस्त्रीभिश्चमरमरुता वीजितो भूमिपालः ॥ ३ ॥ काकैर्निष्कुषितं श्वभिः कवलितं गोमायुभिर्लुण्ठितं स्रोतोभिश्चलितं तटाम्बुलुलितं वीचीभिरांदोलितम् ॥ दिव्यस्त्रीकरचारुचामरमरुत्सवीज्यमानः कदा द्रक्ष्येऽहं परमेश्वरि त्रिपथगे भागीरथि स्वं वपुः ॥ ४ ॥ अभिनवबिसवल्ली पादपद्मस्य विष्णोर्मदनमथनमौलेर्मालतीपुष्पमाला ॥ जयति जयपताका काऽप्यसौ मोक्षलक्ष्म्याः क्षपितकलिकलंका जाह्नवी नः पुनातु ॥ ५ ॥ एतत्तालतमालसालसरल-

व्यालोलवल्लीलताच्छन्नं सूर्यकरप्रतापरहितं शंखेन्दुकुन्दोज्ज्वलम् ॥ गंधर्वामरसिद्धकिन्नरवधूतुङ्गस्तनास्फालितं स्नानाय प्रतिवासरं भवतु मे गांगं जलं निर्मलम् ॥६॥ गांगं वारि मनोहारि मुरारिचरणच्युतम् ॥ त्रिपुरारिशिरश्चारि पापहारि पुनातु माम् ॥ ७ ॥ पापापहारि दुरितारि तरङ्गधारि शैलप्रचारिगिरिराजगुहाविदारि ॥ झंकारकारि हरिपादरजोपहारि गांगं पुनातु सततं शुभकारि वारि ॥८॥ गङ्गाष्टकं पठति यः प्रयतः प्रभाते वाल्मीकिना विरचितं शुभदं मनुष्यः ॥ प्रक्षाल्य गात्रकलिकल्मषमाशु मोक्षं लभेत्पतति नैव नरो भवाब्धौ ॥ ९ ॥

इति श्रीवाल्मीकिविरचितं गङ्गाष्टकं संपूर्णम् २ ।

दुर्गापदुद्धारस्तोत्रम्

श्रीगणेशाय नमः ॥ नमस्ते शरण्ये शिवे सानुकम्पे नमस्ते जगद्व्यापिके विश्वरूपे ॥ नमस्ते जगद्वन्द्यपादारविन्दे नमस्ते जगत्तारिणि त्राहि दुर्गे ॥१॥ नमस्ते जगच्चिन्त्यमानस्वरूपे नमस्ते महायोगिनि ज्ञानरूपे ॥ नमस्ते नमस्ते सदानन्दरूपे नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ २ ॥ अनाथस्य दीनस्य तृष्णातुरस्य भयार्तस्य भीतस्य बद्धस्य जन्तोः ॥ त्वमेका गतिर्देवि निस्तारकर्त्री नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ ३ ॥ अरण्ये रणे दारुणे शत्रुमध्येऽनले सागरे प्रान्तरे राजगेहे ॥ त्वमेका गतिर्देवि निस्तारनौका नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ ४ ॥ अपारे महादुस्तरेऽत्यन्तघोरे विपत्सागरे मज्जतां देहभाजाम् । त्वमेका गतिर्देवि निस्तारहेतुर्नमस्ते जगत्तारिणि त्राहि दुर्गे ॥५॥ नमश्चण्डिके चण्डदुर्दण्डलीलासमुत्खण्डिताखण्डिताशेषशत्रो ॥ त्वमेका गतिर्देवि निस्तारबीजं नमस्ते जगत्तारिणि त्राहि दुर्गे ॥६॥ त्वमेवाघभावाधृतासत्यवादीन्न जाताजितक्रोधनात्क्रोध-

निष्ठा ॥ इडा पिङ्गला त्वं सुषुम्ना च नाडी नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ ७ ॥ नमो देवि दुर्गे शिवे भीमपादे सरस्वत्यरुन्धत्यमोघस्वरूपे ॥ विभूतिः शची कालरात्रिः सती त्वं नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ ८ ॥ शरणमसि सुराणां सिद्धविद्याधराणां मुनिमनुजपशूनां दस्युभिस्त्रासितानाम् ॥ नृपतिगृहगतानां व्याधिभिः पीडितानां त्वमसि शरणमेका देवि दुर्गे प्रसीद ॥ ६ ॥ इदं स्तोत्रं मया प्रोक्तमापदुद्धारहेतुकम् ॥ त्रिसन्ध्यमेकसन्ध्यं वा पठनाद् घोरसङ्कटात् ॥ १० ॥ मुच्यते नात्र सन्देहो भुवि स्वर्गे रसातले ॥ सर्वं वा श्लोकमेकं वा यः पठेद् भक्तिमान् सदा ॥ ११ ॥ स सर्वं दुष्कृतं त्यक्त्वा प्राप्नोति परमं पदम् ॥ पठनादस्य देवेशि किं न सिद्ध्यति भूतले ॥ १२ ॥ स्तवराजमिदं देवि संक्षेपात्कथितं मया ॥१३॥

इति श्रीसिद्धेश्वरीतन्त्रे उमामहेश्वरसंवादे श्रीदुर्गापदुद्धारस्तोत्रम् २५ ।

सरस्वतीस्तोत्रम्

श्रीगणेशाय नमः ॥ ॐ अस्य श्रीसरस्वतीस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः ॥ गायत्री छन्दः ॥ श्रीसरस्वती देवता ॥ धर्मार्थकाममोक्षार्थे जपे विनियोगः॥ आरूढा श्वेतहंसे भ्रमति च गगने दक्षिणे चाक्षसूत्रं वामे हस्ते च दिव्याम्बरकनकमयं पुस्तकं ज्ञानगम्या ॥ सा वीणां वादयन्ती स्वकरकरजपैः शास्त्रविज्ञानशब्दैः क्रीडन्ती दिव्यरूपा करकमलधरा भारती सुप्रसन्ना ॥ १ ॥ श्वेतपद्मासना देवी श्वेतगन्धानुलेपना ॥ अर्चिता मुनिभिः सर्वैऋषिभिः स्तूयते सदा ॥ एवं ध्यात्वा सदा देवीं वाञ्छितं लभते नरः ॥२॥ शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम् ॥ हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥ ३ ॥ या

कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ॥ या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वन्दिता सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥ ४ ॥ ह्रीं ह्रीं हृद्यैकबीजे शशिरुचिकमले कल्पविस्पष्टशोभे भव्ये भव्यानुकूले कुमतिवनदवे विश्ववन्द्यांघ्रिपद्मे ॥ पद्मे पद्मोपविष्टे प्रणतजनमनोमोदसंपादयित्रि प्रोत्फुल्लज्ञानकूटे हरिनिजदयिते देवि संसारसारे ॥५॥ ऐं ऐं ऐं दृष्टमन्त्रे कमलभवमुखांभोजभूते स्वरूपे रूपारूपप्रकाशे सकलगुणमये निर्गुणे निर्विकारे॥ न स्थूले नैव सूक्ष्मेऽप्यविदितविभवे नापि विज्ञानतत्त्वे विश्वे विश्वान्तरात्मे सुरवरनमिते निष्कले नित्यशुद्धे ॥ ६ ॥ ह्रीं ह्रीं ह्रीं जाप्यतुष्टे हिमरुचिमुकुटे वल्लकीव्यग्रहस्ते मातर्मातर्नमस्ते दह दह जडतां देहि बुद्धिं प्रशस्ताम् ॥ विद्ये वेदान्तवेद्ये परिणतपठिते मोक्षदे मुक्तिमार्गे मार्गातीतस्वरूपे भव मम वरदा शारदे शुभ्रहारे ॥ ७ ॥ धीं धीं धीं धारणाख्ये धृतिमतिनतिभिर्नामभिः कीर्तनीये नित्येऽनित्ये निमित्ते मुनिगणनमिते नूतने वै पुराणे ॥ पुण्ये पुण्यप्रवाहे हरिहरनमिते नित्यशुद्धे सुवर्णे मातर्मात्रार्धतत्त्वे मतिमतिमतिदे माधवप्रीतिमोदे ॥ ८ ॥ हूं हूं हूं स्वस्वरूपे दह दह दुरितं पुस्तकव्यग्रहस्ते सन्तुष्टाकारचित्ते स्मितमुखि सुभगे जृम्भिणि स्तम्भविद्ये ॥ मोहे मुग्धप्रवाहे कुरु मम विमतिध्वान्तविध्वंसमीडे गीर्गौर्वाग्भारति त्वं कविवररसनासिद्धिदे सिद्धिसाध्ये ॥९॥ स्तौमि त्वां त्वां च वन्दे मम खलु रसनां नो कदाचित्त्यजेथा मा मे बुद्धिर्विरुद्धा भवतु न च मनो देवि मे यातु पापम् ॥ मा मे दुःखं कदाचित्क्वचिदपि विषयेऽप्यस्तु मे नाकुलत्वं शास्त्रे वादे कवित्वे प्रसरतु मम धीर्मास्तु कुण्ठा कदापि ॥१०॥ इत्येतैः श्लोकमुख्यैः प्रतिदिनमुषसि स्तौति यो भक्तिनम्रो वाणी वाचस्पतेरप्यविदितविभवो वाक्पटुर्मृष्टकण्ठः॥ स स्यादिष्टार्थलाभैः सुतमिव सततं पाति तं सा च देवी सौभाग्यं तस्य

लोके प्रभवति कविता विघ्नमस्तं प्रयाति ॥ ११ ॥ निर्विघ्नं तस्य विद्या प्रभवति सततं चाश्रुतग्रन्थबोधः कीर्तिस्त्रैलोक्यमध्ये निवसति वदने शारदा तस्य साक्षात् ॥ दीर्घायुर्लोकपूज्यः सकलगुणनिधिः सन्ततं राजमान्यो वाग्देव्याः संप्रसादात्त्रिजगति विजयी जाते सत्सभासु ॥ १२ ॥ ब्रह्मचारी व्रती मौनी त्रयोदश्यां निरामिषः ॥ सारस्वतो जनः पाठात्सकृदिष्टार्थलाभवान् ॥ १३ ॥ पक्षद्वये त्रयोदश्यामेकविंशतिसंख्यया ॥ अविच्छिन्नः पठेद्धीमान्ध्यात्वा देवीं सरस्वतीम् ॥ १४ ॥ सर्वपापविनिर्मुक्तः सुभगो लोकविश्रुतः ॥ वाञ्छितं फलमाप्नोति लोकेऽस्मिन्नात्र संशयः ॥ १५ ॥ ब्रह्मणेति स्वयं प्रोक्तं सरस्वत्याः स्तवं शुभम् ॥ प्रयत्नेन पठेन्नित्यं सोऽमृतत्वाय कल्पते ॥ १६ ॥

इति श्रीमद्ब्रह्मणा विरचितं सरस्वतीस्तोत्रं सम्पूर्णम् ३१ ।

श्रीस्तोत्रम्

श्रीगणेशाय नमः ॥ पुष्कर उवाच ॥ राजलक्ष्मीस्थिरत्वाय यथेन्द्रेण पुरा श्रियः ॥ स्तुतिः कृता तथा राजन् जयार्थं स्तुतिमाचरेत् ॥ १ ॥ इन्द्र उवाच ॥ नमस्ते सर्वलोकाना जननीमब्धिसम्भवाम् ॥ श्रियमुन्निद्रपद्माक्षीं विष्णुवक्षःस्थलस्थिताम् ॥ २ ॥ त्वं सिद्धिस्त्वं स्वधा स्वाहा सुधा त्वं लोकपावनी ॥ संध्या रात्रिः प्रभामूर्तिर्मेधा श्रद्धा सरस्वती ॥३॥ यज्ञविद्या महाविद्या गुह्यविद्या च शोभने ॥ आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी ॥ ४ ॥ आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्त्वमेव च ॥ सौम्यासौम्यैर्जगद्रूपैस्त्वयैतद्देवि पूरितम् ॥ ५ ॥ का त्वन्या त्वामृते देवि सर्वयज्ञमयं वपुः ॥ अध्यास्ते देवदेवस्य योगिचिन्त्यं गदाभृतः ॥ ६ ॥ त्वया देवि परित्यक्तं सकलं भुवनत्रयम् ॥ विनष्टप्रायमभवत् त्वयेदानीं समे-

धितम् ॥ ७ ॥ दाराः पुत्रास्तथागारं सुहृद्धान्यधनादिकम् ॥ भवत्येतन्महाभागे नित्यं त्वद्वीक्षणान्नृणाम् ॥८॥ शरीरारोग्यमैश्वर्यमरिपक्षक्षयः सुखम् ॥ देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्लभम् ॥ ९ ॥ त्वमम्बा सर्वलोकानां देवदेवो हरिः पिता ॥ त्वयैतद्विष्णुना चाम्ब जगद् व्याप्तं चराचरम् ॥ १० ॥ मानं कोषं तथा कोषं मा गृहं मा परिच्छदम् ॥ मा शरीरं कलत्रं च त्यजेथाः सर्वपावनि ॥ ११ ॥ मा पुत्रान्मा सुहृद्वर्गान् मा पशून्मा विभूषणम् ॥ त्यजेथा मम देवस्य विष्णोर्वक्षःस्थलालये ॥ १२ ॥ सत्त्वेन सत्यशौचाभ्यां तथा शीलादिभिर्गुणैः ॥ त्यजन्ते ते नराः सद्यः सन्त्यक्ता ये त्वयाऽमले ॥ १३ ॥ त्वयाऽवलोकिताः सद्यः शीलाद्यैरखिलैर्गुणैः ॥ कुलैश्वर्यैश्च युज्यन्ते पुरुषा निर्गुणा अपि ॥ १४ ॥ स श्लाघ्यः स गुणी धन्यः स कुलीनः स बुद्धिमान् ॥ स शूरः स च विक्रान्तो यस्त्वया देवि वीक्षितः ॥१५॥ सद्यो वैगुण्यमायान्ति शीलाद्याः सकला गुणाः ॥ पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे ॥ १६ ॥ न ते वर्णयितुं शक्ता गुणान् जिह्वापि वेधसः ॥ प्रसीद देवि पद्माक्षि मास्मांस्त्याक्षीः कदाचन ॥ १७ ॥ पुष्कर उवाच ॥ एवं स्तुता ददौ श्रीश्च वरमिन्द्राय चेप्सितम् ॥ सुस्थिरत्वं च राज्यस्य संग्रामविजयादिकम् ॥ १८ ॥ स्वस्तोत्रपाठश्रवणकर्तॄणां भुक्तिमुक्तिदम् ॥ श्रीस्तोत्रं सततं तस्मात्पठेच्च शृणुयान्नरः ॥ १९ ॥

इति अग्निपुराणान्तर्गतं श्रीस्तोत्रं समाप्तम् ५ ।

महालक्ष्म्यष्टकम्

श्रीगणेशाय नमः ॥ इन्द्र उवाच ॥ नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ॥ शंखचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ॥ १ ॥ नमस्ते गरुडारूढे कोलासुरभयंकरि ॥ सर्वपापहरे देवि महालक्ष्मि नमोऽस्तुते ॥२॥

सर्वज्ञे सर्ववरदे सर्वदुष्टभयंकरि ॥ सर्वदुःखहरे देवि महालक्ष्मि नमोऽस्तुते ॥ ३ ॥ सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि ॥ मंत्रमूर्ते सदा देवि महालक्ष्मि नमोऽस्तुते ॥ ४ ॥ आद्यन्तरहिते देवि आद्यशक्ति महेश्वरि ॥ योगज्ञे योगसंभूते महालक्ष्मि नमोऽस्तुते ॥ ५ ॥ स्थूलसूक्ष्ममहारौद्रे महाशक्ति महोदरे ॥ महापापहरे देवि महालक्ष्मि नमोऽस्तुते ॥ ६ ॥ पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि ॥ परमेशि जगन्मातर्महालक्ष्मि नमोऽस्तुते ॥ ७ ॥ श्वेताम्बरधरे देवि नानालंकारभूषिते ॥ जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥८॥ महालक्ष्म्यष्टकस्तोत्रं यः पठेद्भक्तिमान्नरः ॥ सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ॥ ९ ॥ एककाले पठेन्नित्यं महापापविनाशनम् ॥ द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितः ॥१०॥ त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम् ॥ महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ॥ ११ ॥

इतीन्द्रकृत श्रीमहालक्ष्म्यष्टकं संपूर्णम् ६ ।

श्रीगणेशाय नमः ।

अथ आर्यास्तवः

वैशम्पायन उवाच ।

आर्यास्तवं प्रवक्ष्यामि यथोक्तमृषिभिः पुरा ।
नारायणीं नमस्यामि देवीं त्रिभुवनेश्वरीम् ॥ १ ॥
त्वं हि सिद्धिर्धृतिः कीर्तिः श्रीर्विद्या सन्नतिर्मतिः ।
संध्या रात्रिः प्रभा निद्रा कालरात्रिस्तथैव च ॥ २ ॥
आर्या कात्यायनी देवी कौशिकी ब्रह्मचारिणी ।
जननी सिद्धसेनस्य उग्रचारी महाबला ॥ ३ ॥ -

लया च विजया चैव पुष्टिस्तुष्टिः क्षमा दया।
ज्येष्ठा यमस्य भगिनी नीलकौशेयवासिनी ॥ ४ ॥
बहुरूपा विरूपा च अनेकविधचारिणी।
विरूपाक्षी विशालाक्षी भक्तानां परिरक्षिणी ॥ ५ ॥
पर्वताग्रेषु घोरेषु नदीषु च गुहासु च।
वासस्तव महादेवि वनेषूपवनेषु च ॥ ६ ॥
शबरैर्बर्बरैश्चैव पुलिन्दैश्च सुपूजिता।
मयूरपिच्छध्वजिनी लोकान् क्रमसि सर्वशः ॥ ७ ॥
कुक्कुटैश्छागलैर्मेषैः सिंहैर्व्याघ्रैः समाकुला।
घण्टानिनादबहुला विन्ध्यवासिन्यभिश्रुता ॥ ८ ॥
त्रिशूलपट्टिशधरा सूर्यचन्द्रपताकिनी।
नवमी कृष्णपक्षस्य शुक्लस्यैकादशी तथा ॥ ६ ॥
भगिनी बलदेवस्य रजनी कलहप्रिया।
आवासः सर्वभूतानां निष्ठा च परमा गतिः ॥ १० ॥
नन्दगोपसुता चैव देवानां विजयावहा।
चीरवासाः सुवासाश्च रौद्री सन्ध्याचरी निशा ॥११॥
प्रकीर्णकेशी मृत्युश्च सुरामांसबलिप्रिया।
लक्ष्मीरलक्ष्मीरूपेण दानवानां वधाय च ॥ १२ ॥
सावित्री चापि देवानां माता मन्त्रगणस्य च।
कन्यानां ब्रह्मचर्यत्वं सौभाग्यं प्रमदासु च ॥ १३ ॥
अन्तर्वेदी च यज्ञानामृत्विजां चैव दक्षिणा।
कर्षुकाणां च सीतेति भूतानां धरणीति च ॥ १४ ॥
सिद्धिः सांयात्रिकाणां तु वेला त्वं सागरस्य च।
यक्षाणां प्रथमा यक्षी नागानां सुरसेति च ॥ १५ ॥

ब्रह्मवादिन्यथोदीक्षा शोभा च परमा तथा ।
ज्योतिषां त्वं प्रभा देवी नक्षत्राणां च रोहिणी ॥ १६ ॥
राजद्वारेषु तीर्थेषु नदीनां सङ्गमेषु च ।
पूर्णा च पूर्णिमाचन्द्रे कृत्तवासा इति स्मृता ॥ १७ ॥
सरस्वती च वाल्मीके स्मृतिर्द्वैपायने तथा ।
ऋषीणां धर्मबुद्धिस्तु देवानां मानसी तथा ॥ १८ ॥
सुरा देवि तु भूतेषु स्तूयसे त्वं सुकर्मभिः ।
इन्द्रस्य चारुदृष्टिस्त्वं सहस्र नयनेति च ॥ १९ ॥
तापसाना च देवी त्वमरणी चाग्निहोत्रिणाम् ।
क्षुधा च सर्वभूतानां तृप्तिस्त्वं दैवतेषु च ॥ २० ॥
स्वाहा तृप्तिर्धृतिर्मेधा वसूनां त्वं वसूमती ।
आशात्वं मानुषाणां च पुष्टिश्च कृतकर्मणाम् ॥ २१ ॥
दिशश्च विदिशश्चैव तथा ह्यग्निशिखा प्रभा ।
शकुनी पूतना त्वं च रेवती च सुदारुणा ॥ २२ ॥
निद्रासि सर्वभूतानां मोहिनी क्षत्रिया तथा ।
विद्यानां ब्रह्मविद्या त्वमोङ्कारोऽथ वषट् तथा ॥ २३ ॥
नारीणां पार्वतीं च त्वां पौराणीमृषयो विदुः ।
अरुन्धती च साध्वीनां प्रजापतिवचो यथा ॥ २४ ॥
यथार्थनामभिर्दिव्यैरिन्द्राणी चेति विश्रुता ।
त्वया व्याप्तमिदं सर्वं जगत्स्थावरजङ्गमम् ॥ २५ ॥
संग्रामेषु च सर्वेषु अग्निप्रज्वलितेषु च ।
नदीतीरेषु चौरेषु कान्तारेषु भयेषु च ॥ २६ ॥
प्रवासे राजबन्धे च शत्रूणां च प्रमर्दने ।
प्राणात्ययेषु सर्वेषु त्वं हि रक्षा न संशयः ॥ २७ ॥

